Patanjali
Mahabhasyapradipodyotah

PK
531
A15
1899
v.3
pt.5

PK
561
A15
1911
V. 3
PT. 5



BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1162.

महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYA PRADĪPODDYOTA



BY

NAGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇĀSTRI.

VOL. III. FASCICULUS V.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1907.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
15, PICCADILLY, LONDON, W., AND MR. OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ...	Rs.	1	4
Advaitachintā Kaustabha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 3-14 @ /10/ each	7	8
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
*Anu Bhashya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Śāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc. 2-5 @ /10/ each	2	8
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6; Vol. II. Fasc. 1-5 @ 1/ each	11	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-2 @ 1/- each ...	2	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2 @ /10/ each	1	4
Baudhāyana Śrauta Sūtra, Fasc. 1-3 @ /10/ each	1	14
*Bhamati, Fasc. 4-8 @ /10/ each	3	2
Bhāṭṭa Dipikā Vol. I, Fasc. 1-5 @ /10/ each	3	2
Brahma Sutra, Fasc. 1 @ /10/ each	0	10
Bṛhaddēvatā, Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Cāntideva, Fasc. 1-4 @ /10/ each	2	8
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-7 @ /10/ each	11	14
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-12 @ /10/ each ...	7	8
*Caturvarga Chintāmaṇi, Vols. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10, Vol IV, Fasc. 1-5 @ /10/ each ...	36	4
Çlokavartika, (English) Fasc. 1-5 @ 1/4/ each	6	4
*Çrauta Sūtra of Āpastamba, Fasc. 6-17 @ /10/ each	7	8
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /10/ each; Vol 4, Fasc. 1	10	0
Çri Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāu Kriyā Kaumudi, Fasc. 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7 @ /10/ each ...	4	6
Ditto Ācārasāra, Vol. II, Fasc. 1-2 @ /10/ each	1	4
Gobhiliya Grihya Sutra, Fasc. 1-12 @ /10/ each	7	8
Kala Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
Kūrma Purāṇa, Fasc. 1-9 @ /10/ each	5	10
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	3	0
*Lalitavistara, Fasc. 3-6 @ /10/ each	2	8
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-4 @ /10/ each.	15	10
Manutikā Saṃgraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
*Markandeya Purana, Fasc. 4-7 @ /10/ each	2	8
*Mimāṃsā Darçana, Fasc. 3-19 @ /10/ each	10	10
Nyāyavārtika, Fasc. 1-6 @ /10 each	3	12
*Nirukta, Vol. IV, Fasc. 1-8 @ /10/ each	5	0
*Nitisara, Fasc. 2-5 @ /10/ each	2	

महाभाष्यप्रदीपोद्योतः ।

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ॥

कृते ऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥
अलब्धगाधे गाम्भीर्य्यादुत्तान इव सौष्ठवात् ॥

अर्धं नपुंसकम् । २ । २ । २ ॥

सूत्रे "नपुंसकम्" इत्युकेरिहकस्मादिति प्रश्नोऽनुपपन्न इत्याशङ्क्याह

नपुंसकस्येति ॥ (कै)

अर्धं नपुंसकम् ॥ नित्यक्लीबो ऽर्धशब्द एकदेशे विद्यमानेनावयविवाचिना सह प्रायवत् । भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेऽशक इत्यमरः ॥ इह काकाक्षिन्यायेन वा पुंसीति पूर्वोत्तराभ्यां सम्बध्यते । तत्र शकलखण्डे इति नपुंसकत्वस्य रूपभेदाद्विशेषे पुंस्यविकल्पादस्त्रियामिति फलितम् ।

"अर्धं नपुंसकम्" ॥ 'आविशलिङ्ग इति' । नियतलिङ्ग इत्यर्थः । 'तस्येदं ग्रहणमिति' । तत्रैवार्थे नपुंसकत्वस्यान्यभिचाराद् अवयववाचौ ह्यभिधेयवशेन त्रिलिङ्गः, अपूपार्द्धं मया भक्षितं दन्तार्द्धमास्यातितं ग्रामार्द्धो नगरार्द्धः, सर्पिषार्द्धया व्यनक्तीति 'तस्यार्द्धाः शल्वार्द्धाः परिशिष्ट

Mahābhāsyapradipoddyota, Vol. III., Fasc. V., No 1162.

सूत्रे नपुंसकग्रहणं किमर्धशब्दस्यार्थविशेषप्रतिपत्तये उत समासगतरूपविशेषप्रतिपत्तये। नाद्य इत्याह

अव्यवस्थितत्वादिति। (कै)

नपुंसकत्वस्यापूपार्धमित्यादावन्यार्थेऽपि दर्शनादिति भावः॥ नान्त्य इत्याह

कृते चेति। (कै)

तस्य नपुंसकत्वलक्षणविशेषानवसायेन तल्लक्षणरूपविशेषाभावादिति भावः॥ अधिकरणस्याकाङ्क्षस्य निर्ज्ञातत्वान्नेत्याशङ्क्याह

नपुंसकत्वेति। (कै)

कस्मिन्नर्थे पुंस्त्ववाचक इति भाष्याचरार्थः॥ पुल्लिङ्ग एवेति भ्रमं वारयति।

नियमेनेति॥ (कै)

नपुंसकग्रहणं ज्ञापकमिति। (कै)

न च स्त्रीलिङ्गरूपमेव किन्न स्यादिति वाच्यम्। भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषितत्वात्। शकलस्त्रीति निर्देशेनैव निर्णयात्। अर्ध इत्यत्र तु रूपभेदात्पुंस्त्वावगतौ सत्यां वा पुंसीति तद्विकल्पेनाविशेषात्स्त्रीनपुंसके लभ्येते। तथा चार्धशब्दस्त्रिष्विति फलितोऽर्थः। समेऽप्यर्धके तु अर्धं नित्य-

---

मध्ये निविदं दधातीति। भाष्ये त्ववयववाचौ पुल्लिङ्ग इत्युपलक्षणं, क्वचित्तु समप्रविभागे स्त्रीलिङ्गता दृश्यते 'एकान्तृचेर्द्धा युग्मास्वि'ति, युग्मासु ऋक्षु व्यर्द्धाः शस्त्रा निविदं दध्यादित्यर्थः, तस्यार्धत्वेन निर्वाहः। अर्द्धमिति नपुंसकनिर्देशः शब्दरूपापेक्षयापि सम्भाव्येत, यथा 'खमज्ञातिधनाख्यायाम्'

निर्देशेन नपुंसकत्वमात्रे लब्धेऽपि नित्यनपुंसकत्वलाभाय तस्यावश्यकत्वम् अन्यथा अपूपार्धन्दन्तार्धमित्यादावसमांशवाचिन्यपि एकदेशिसमासः स्यादिति चिन्त्यमेतत्। परे तु समप्रविभागे नपुंसकलिङ्ग इत्यस्य नपुंसकलिङ्गोऽपीत्यर्थः। अत एव [१]"ए ओङ्" [२]"एच" इति अनयोः सूत्रयोर्भाष्ये एचो ह्रस्वविधाने ऽर्धैकारार्धौकारौ प्राप्नुत इति शङ्कायां[३] नैव लोके नापि वेदेऽर्ध एकारोऽर्ध

---

१ ए ओङ्। ३। ऐ औच्। ४॥

२ एच इग् ह्रस्वादेशे। १। १। ४८॥

३ ननु चैङः सस्थानतरावर्ध एकारार्ध ओकारश्च। न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्। ननु च भो श्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते। सुजाते ए अश्व सूनृते। अध्वर्यो ओ अद्रिभिः सुतम्। शुक्रं ते ए अन्यद् यजतम् ते ए अन्यद् इति। पार्षदक्षतिरेषा तच्च भवतां नैव हि। लोके नान्यस्मिन् वेदे अर्ध एकारो ऽर्ध ओकारो वास्ति॥ ३। ४। १। १।

नपुंसकमित्यर्थः। अर्धं पिप्पल्याः अर्धपिप्पली। एकविभक्तावषष्ठ्यन्तवचनमिति। वा। पिप्पलीशब्दस्यानुपसर्जनत्वान्न ह्रस्वः। एकाधिकरणे किम्। अर्धं पिप्पलीनाम्। कथं तर्ह्यर्धपिप्पल इति। अर्धानि पिप्पलीनामिति विग्रहे मा भूत्। खण्डसमुच्चये तु भविष्यति। अर्धपिप्पली च अर्धपिप्पली

'बन्धुनि बहुव्रीहाविति' तस्मान्नपुंसकमित्युक्तम्। 'अर्द्धपिप्पलीति'। पिप्पलीशब्दस्यैकविभक्ति चेत्युपसर्जनसंज्ञा न भवति एकविभक्तावषष्ठ्यन्तमिति वचनात्। 'अर्द्धं पिप्पलीनामिति'। न तर्हीदानीमिदं भवति अर्द्धानि पिप्पलीनामर्द्धपिप्पल्य इति, नैतदस्ति विग्रहे भवति खण्डसमुदाये

ओकारो वास्तीत्युत्तरपरभाष्ये समविभागविषयेऽपि पुल्लिङ्गः प्रयुक्तः। अवयववाची तु पुल्लिङ्ग एव॥

अपूपार्धमिति। (कै)

समप्रविभाग एव अन्यत्रापूपार्ध इत्येव [1]"परवल्लिङ्गमिति" सूत्रे भाष्येऽप्येतत्स्पष्टमित्युत्तरसूत्रे स्फुटीकरिष्यते। अन्यतरस्यां ग्रहणापकर्षेण योगविभागेन वा एकदेशिसमासविषये षष्ठीसमासः सूचकृतोऽपीष्ट एव। एवं चारम्भप्रत्याख्यानयोः समफलता। नपुंसकग्रहणे तु सूत्रेषु निर्देशो लिङ्गाविवक्षायां ज्ञापकमित्याहुः॥ भाष्ये

अर्धपिप्पलीनामिति। (भा)

द्रव्यानां पिप्पलीनामर्धमित्यर्थः। न च समासे एकत्वसङ्ख्यायाम् औत्सर्गिकत्वात्कथमत्र समासापादनम् एकत्वस्यापि तत्राभानाच्छुद्ध-

---

१ अ २। पा ४। सू २९।

चेत्यादि विग्रहात्। एकदेशिनेति किम्। अर्धं पशोर्देवदत्तस्य। देवदत्तोऽत्र स्वामी नत्ववयवीति न तेन समासः। पशुना तु स्यादेव। अर्धपशुर्देवदत्तस्येति। देवदत्तस्वामिकं पशोरर्धमित्यर्थः। नपुंसकं किम्। ग्रामार्धो नगरार्धः। अर्धमिति निर्देशादेव सिद्धे नपुंसकग्रहणं सूत्रे

भवति अर्द्धपिप्पली चार्द्धपिप्पली चार्द्धपिप्पल्य इति। 'देवदत्तशब्देन समासो न भवतीति'। देवदत्तोऽत्र स्वामी न त्वेकदेशी यस्त्वेकदेशी पशुस्तेन भवत्येव समासः। अर्द्धपशुर्देवदत्तस्येति, देवदत्तस्वामिकं पशोरर्द्धमित्यर्थः, तत्र समुदायेन सम्बन्धान्नास्ति सापेक्षत्वम्। अयं योगः शुक्लो-

पिप्पलीत्वेनानेकपिप्पलीबोधसम्भव इति ग्रङ्गाग्रयः। इतरोऽर्ध-पदार्थस्य तत्र पञ्चपिप्पलीरूपत्वेन समासे बहुवचनं मत्वा पृच्छति

न वा भवतीति ॥ (भा)

अर्थान्तरे भवति न त्वेतदर्थे इत्याह

भवति यदा (भा)

इत्यादिना ॥

अर्थश्चेति। (कै)

दशानां पिप्पलीनाम् अर्धं पञ्च इत्यत्रार्थः। पिप्पलीनां प्रत्येकम् अर्धानि बह्वनीति तत्रार्थः ॥ भाष्ये

तदा न भवितव्यम् (भा)

इत्यर्थमभिप्रेत्याह

लिङ्गनिर्देशो न विवक्षित इति ज्ञापयितुं तेन तस्येदमिति लिङ्गत्रयेऽपि भवति। एतत्सूत्रं परत्वल्लिङ्गमित्यत्र भाष्ये प्रत्याख्यातम्। तथा हि। अर्धपिप्पलीति कर्मधारयेण सिद्धम्। समुदाये दृष्टाः शब्दा अवयवेऽपि वर्त्तन्ते इति न्यायात्। समप्रविभागादन्यत्र हि तवाप्येषैव गतिः। अर्धा-

---

ऽवक्तुं, कथमर्द्धपिप्पली, सामानाधिकरण्यो भविष्यति। अर्द्धं चासौ पिप्पली चेति। ननु च यद्यर्द्धं न पिप्पली अथ पिप्पली नार्द्धम् अर्द्धं पिप्पली चेति विप्रतिषिद्धं, नास्ति विप्रतिषेधः, समुदाये हि दृष्टाः शब्दा अवयवेष्वपि वर्त्तन्ते। किञ्च समप्रविभागादन्यत्रार्द्धचन्द्रादावयमेव गतिप्रकारः समग्र-

अर्धपिप्पलीत्येव स्यादिति । (कै)

यद्यप्यर्धपदार्थो बहवः तथाप्यर्धशब्देनैकत्वावरुद्धसमुदायस्यैव भानादिति भावः ॥

तदा कस्मान्नेति । (भा)

समासः कुतो न इत्यर्थः ॥

तिरोहित भेदस्येति । (कै)

तिरोहितावयवभेदस्येत्यर्थः । समूहः समूहिभ्यो भिन्नोऽपीति भावः ॥

हारः । अर्धहारः । अर्धजरतीयम् । अर्धवैशसम् । अर्धोक्तम् । अर्धविलोकितमित्यादिदर्शनात् । न च समप्रविभागे षष्ठीसमासं बाधितुमिदं सूत्रमिति वाच्यम् । षष्ठीसमासस्यापीष्टत्वादिति । तथा च कालिदासः प्रायुङ्क्त । प्रेम्णा शरीरार्धहरां हरस्येति ॥

विभागेऽपि तथास्तु, इदं तर्हि प्रयोजनं समप्रविभागे षष्ठीसमासो माभूदिति, इष्यते षष्ठीसमासेऽपि, तथा च भगवान्पिङ्गलनागः प्रयुङ्क्ते, स्वरार्द्धं चार्यार्द्धमिति । एवं तर्हि गौणत्वात्सामानाधिकरण्यस्य विशेषणसमासो न किल स्यादित्ययमारम्भः ॥

द्वितीयतृतीयचतुर्थतुर्य्याण्यन्यतरस्याम्। २। २। ३॥

नान्तरीयकतयेति। (कै)

तत्सिद्ध्यनुगुणतया ज्ञापकत्वमस्येति भावः॥

स्मरणाय पुनर्ज्ञाप्यत इति। (कै)

वारद्वयज्ञापितं दृढ़संस्कारजननद्वारा शीघ्रं स्मरणाय इत्यर्थः। विनिगमनाविरहादिदमपि ज्ञापकमिति भावः॥ सामान्येऽवयवाभावादाह

सामान्याश्रयसमूहेति। (कै)

[1]"षष्ठी" इत्यादिना सामान्यशास्त्रेण विहितेत्यर्थः॥

---

१ अ २। पा २। सू ८॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्॥ एतानि एकदेशिना सह वा प्राग्वत्स्युरेकं चेद् द्रव्यम्। द्वितीयं भिक्षायाः द्वितीयभिक्षा। भिक्षाद्वितीयम्। तृतीयभिक्षा। भिक्षातृतीयमित्यादि। एकदेशिना किम्। द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरणे किम्। द्वितीयं भिक्षा-

---

"द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्"॥ 'अन्यतरस्यां ग्रहणात्सोऽपि भवतीति'। ननु च पूरणप्रत्ययान्ता एवैते द्वितीयादयस्तत्र पूरणगुणसुहितेत्यादिना प्रतिषेधेन भवितव्यं, तदापि 'पूरणाद्भागे तीयादनि'ति

(द्वितीयतृतीयचतुर्थतुर्य्याण्यन्यतरस्याम् । २ । २ । ३ ।) (अ. २ । पा. २ । आ. १)

प्रतिनियत इति । (कै)

"अर्धम्" इत्यादि प्रायेण विहितः ॥ भाष्ये

अवयवविधाविति । (भा)

तद्विषये नोत्सर्गप्रवृत्तिरित्यर्थः ॥

न्यायादिति । (कै)

येन नाप्राप्तिन्यायादित्यर्थः ॥

विरोधाद् (कै)

इत्यादि । तदुभयमत्ते हि बाध्यबाधकभावः । प्रकृते चोभयरूपभावात् तद्भाव इति वार्त्तिकमतेनेदं प्रयोजनमुक्तमित्यन्वयः ॥

भाष्यकारस्त्विति । (कै)

"सत्यपि सम्भवे बाधनं भवति" इति तदुक्तेरिति भावः ॥ नन्वीदृशं दधिदानं तक्रदानस्य निवर्त्तकं दृष्टं तत्र ह्येकफलतास्ति न च सा प्रकृते इत्यत आह

णाम् । स्यादेतत् । पूर्वसूत्रवदिदमपि प्रत्याख्यायताम् । तथा हि । समुदायशब्दस्यावयवे वृत्तौ कर्मधारयेण द्वितीयाभिक्षेत्यादि सिद्धम् । भिक्षाद्वितीयमित्यादि तु षष्ठीसमासेन सिद्धम् । मैवम् । पूरणेति षष्ठीसमासनिषेधात् । सिद्धान्ते त्वस्मिन् सूत्रेऽन्यतरस्यां ग्रहणसामर्थ्यात्तत्र षष्ठी-

---

स्वार्थिकोऽन्प्रत्ययः क्रियते तदापि पूरणगुणसुहितार्थेत्यर्थशब्दस्य प्रत्येकमभिसम्बन्धात्पूरणार्थग्रहणं न तु तदधिकारविहितप्रत्ययग्रहणमिति भवितव्यमेव प्रतिषेधेन तत्कथं सोऽपि भवतीत्याह । 'पूरणगुणेत्यादि' ।

अर्थाभिधाने इति ॥ (कै)

प्रतिपत्तिः। (कै)

प्राप्तिः। वस्तुतो भाष्यनये विरोधाभाव इवैकफलत्वाभावेऽपि बाध इति निरूपितम् आकड़ारसूत्रे भाष्ये ॥

शबादेशाः श्यन्नादय इति। (भा)

तत्र श्नमादेशत्वाच्छपं निवर्त्तयति भित्वादन्त्यादचः परो रमागमवदिति भावः ॥ भाष्ये

यत्रोत्सर्गापवादमिति। (भा)

यत्रोत्सर्गापवादं महाविभाषाविकल्पितं तत्रेति पाठान्तरम्। "अस्त्राङ् पूर्वपदाद्वा" इत्यतो ङीप् ङीष्विधौ वा इत्यनुवृत्तिरिति पाठः। उत्सर्गापवादयोरुभयोरपि वैकल्पिकत्वं दर्शयितुं ङीष् ङीब् विधौ इत्युक्तम् ॥

वार्त्तिककारस्येति। (कै)

यदि त्वसंयोगोपधाद् इत्याद्यनुवृत्तौ प्रतिपत्तिगौरवमिति वार्त्तिकाशय इति भावः ॥

समासो लभ्यते। वाक्यस्य महाविभाषयैव सिद्धेः। नन्वेतत्सूत्रं विनापि पूरणाद्भाग इति स्वार्थेऽप्रत्ययं कृत्वा तदन्तेन षष्ठीसमासं करिष्याम इति चेन्न। तत्रापि प्रतिषेधसाम्यात्। पूरणेत्यत्र हि अर्थग्रहणं न तु पूरणाधिकारविहितप्रत्ययग्रहणम्। अर्थशब्दस्य प्रत्येकमभिसम्बध्यात्। स्वार्थि-

---

वाक्यस्य महाविभाषयैव सिद्धत्वात् षष्ठीसमासप्राप्यर्थमेवान्यतरस्यां ग्रहणमिति भावः। पूर्वं तु षष्ठीसमासापवादो योग इत्याद्यप्राप्यभिप्रायेणोक्तं,

(द्वितीयतृतीयचतुर्थतुर्य्याण्यन्यतर- (अ. २ । पा. २ । आ. १)
स्याम् । २ । २ । ३ ।)

ङीष एव त्वनुदात्तविधाने इति । (कै)

ङीबादेशद्वारेत्यर्थः ॥

नित्ये स्वरमात्रविधाने (कै)

इत्यस्यापि स्वरमात्र फलके ङीबादेशविधाने इत्यर्थः । नित्यत्वं वाग्रहणाननुवृत्तेः । तदनुवृत्तौ हि पक्षे ङीष् श्रवणं स्यादेवेति भावः ॥ भाष्ये

इदं तर्हि प्रयोजनम् अर्धपिप्पली (भा)

इत्यादि "परवल्लिङ्गम्" इति सूत्रस्थभाष्येणेदं विरुध्यते । तत्र हि एकदेशिसमासो नारभ्यते कथमर्धपिप्पलीति समानाधिकरणो भविष्यति। अर्धं चासौ पिप्पली चेति । न चैकदेशिसमारम्भे षष्ठी समासस्य तेन बाधो भवति । अन्यथा षष्ठीसमासोऽपि प्राप्नोति । दृश्यते षष्ठीसमासोऽपि । अपूपार्धं मया भक्षितं लब्धं मया ग्रामार्धम् इति । एवं पिप्पल्यर्धम् इत्यपि भवितव्यमित्युक्तं तस्माद् यथाश्रुतसूचमते एकदेशयुक्तिरियम् ॥

काच्च प्रकृत्यर्थेनार्थवन्त इति अनन्तस्यापि पूरणार्थतास्त्येवेति भाष्ये स्थितम् । अत एव "तान्युऽच्छषष्ठाङ्कितसैकतानी"त्यत्र (रघुवंशपञ्चमसर्गस्य ८ श्लोकः) समासः ग्रामादिक इत्याऽहुः । वस्तुतस्तु परवल्लिङ्गमिति सूत्रे तत्पुरुषग्रहणं द्विगुप्राप्तेत्यादिवार्त्तिकं पूर्वापरेत्यादिसिद्धौ च भाष्ये प्रत्याख्याता । तथा च भिक्षाद्वितीयादिसिद्धये संज्ञाप्रमाण-

---

यद्वा सत्यस्मिन्योगे षष्ठीसमासप्रतिषेधस्यास्य च षष्ठीसमासबोधकत्वमविप्रियमिति मत्वा तथोक्तम् । अयमपि योगः शक्यो ऽवक्तुं, कथं, समुदायावयवयोरौपचारिके सामानाधिकरण्ये सति द्वितीयभिक्षादिसिद्धं

उन्मत्तगङ्गम् अव्ययीभावेनेति। (भा)

यद्यपि वाक्येन संज्ञानवगमात् सोऽव्ययीभावो नित्यसमासत्वदृग्रः। तद्वत् समासान्नूनार्थकवाक्याभावात् तथापि वापदं तत्र सम्बध्यत एव। अत एव वाक्यं भवत्येव। अत एव "संज्ञायामि"ति समासविषयेऽपि वाप्यामश्वो वाप्यश्च इति वाक्यं भाष्याद्युक्तं संगच्छत इति भावः॥

पूरणाधिकारेति। (कै)

पूरणशब्दस्य स्वरितत्वादित्यभिमानः॥ पर्य्यवसन्नशब्दं व्याचष्टे

अनाव्यवहितमिति। (कै)

स्वरभेदप्राप्तमिति यावत्॥

न तु तदधिकारेति। (कै)

एवं सूत्रे विनिगमनाविरहाद् भाष्यप्रमाणाच्चान् प्रत्ययान्तानां केवलानां च द्वितीयादीनां ग्रहणं भिक्षासम्बन्धिद्वित्वसंख्यापूरणमित्यर्थः॥ भाष्ये

एवं तर्हीति। (भा)

अन्यतरस्यामित्येतत् सामर्थ्यात् पूरणेति प्रतिषेधो नेति भावः॥

त्वादिनिर्देशानां सामान्यापेक्षज्ञापकताश्रयणीया पूरणेत्यादिनिषेधो ऽनित्य इति। एवञ्चोञ्छषष्ठेत्यपि साध्विति दिक्। तुरीयस्यापीष्यत इति वृत्तिकाराः। एतच्च भाष्यादौ नास्ति॥

मुख्यार्थवृत्तौ षष्ठीसमासे तु भिक्षाद्वितीयमित्यादि भविष्यतीति, नैतत्सुसूच्यते, अनेनैव खल्वन्यतरस्यां ग्रहणेन षष्ठीसमासः प्राप्यते कथमस्मिन्योगेऽसति भविष्यति॥

प्राप्तापन्ने च द्वितीयया। २। २। ४॥

अयमप्युच्यते (भा)

इत्यादि। उभयोरपि प्राप्तापन्नग्रहणेन विशेषविहितत्वादित्यर्थः॥ "द्वितीयया" इत्यत्र प्रश्लेषे उद्देश्यासन्निधानं चकारेण व्यवधानं चेति भावेनाह

प्राप्तापन्ने च द्वितीयया॥ एतौ द्वितीयान्तेन सह प्राग्वत्। पक्षे द्वितीयाश्रितेतिसमासः। प्राप्तो जीविकां प्राप्तजीविकः। जीविकाप्राप्त इति वा। आपन्नजीविकः। जीविकापन्नः। यद्यपि प्राप्ता जीविका येनेति क्तवा कर्मणि क्तान्तेन बहुव्रीहौ प्राप्तजीविक इत्यादि सिध्यति। तथापि समासान्तोदात्तार्थं वचनं प्राप्तसुख इत्याद्यर्थञ्च। इह हि बहुव्रीहौ जातिकालसुखादिभ्य इति निष्ठायाः परनिपातः स्यात्। लिङ्गविशिष्टपरिभाषया

"प्राप्तापन्ने च द्वितीयया"॥ 'प्राप्तजीविक इति'। एकविभक्तीत्युपसर्जनत्वाद्ह्रस्वत्वम्। प्राप्ता जीविका येनेति कर्मणि क्तान्तेन बहुव्रीहावप्येतत्सिद्धं, समासान्तोदात्तत्वार्थं तु वचनम्। इह प्राप्तसुखः प्राप्तदुःख इत्यादिषु जातिकालसुखादिभ्य इति प्राप्तापन्नयोः परनिपातप्रसङ्गश्च। इह लिङ्गविशिष्टपरिभाषया प्राप्ताशब्दस्याप्ययं समासो भवति, प्राप्ता जीविकां

सौचत्वाच्चेति ॥ (कै)

सूचारम्भ इति ॥ (कै)

"द्वितीयाश्रित" इत्येव सिद्धे एतत् सामर्थ्यादिति भावः ॥

लिङ्गविशिष्टेति । (कै)

एकादेशस्य पूर्वान्तत्वादित्यपि बोध्यम् ॥

प्राप्तशब्दस्याप्ययं समासः । प्राप्ता जीविका प्राप्तजीविकेति । नन्वेक-विभक्तीत्युपसर्जनतया जीविकाशब्दस्य ह्रस्वोऽस्तु नाम । प्राप्तशब्दस्य तु कुतः स । अत्र भाष्यम् । अचेति पूर्वपदस्याकारोऽपि सूत्रेऽस्मिन् विधीयते । चकारेण समुच्चयार्थेनाकारश्लेषस्यानुमानादिति प्राप्तापन्ने समस्येते । अ च अत्वं च भवति प्राप्तापन्नयोः । सौचत्वाच्च प्रकृतिभावो नेति भाव इति प्राचः । वस्तुतस्तु द्वितीयेत्यस्यानन्तरमकारश्लेषो बोध्यः । एवं हि प्रकृतिभावप्रसङ्ग एव नास्तीति बोध्यम् ॥

प्राप्तजीविका इति, पुंवद्भावो वक्तव्यः । भाष्ये त्वकारः पूर्वपदस्य विधीयत इत्युक्तं, चकारेण समुच्चयार्थेनाकारश्लेषोऽनुमीयते सौचत्वाच्च निर्देशस्य प्रकृतिभावाभावः, प्राप्तापन्ने द्वितीयान्तेन स समस्येते अ च अत्वं च भवति प्राप्तापन्नयोरित्यर्थः ॥

कालाः परिमाणिना। २। २। ५॥

तत्पुरुषे प्राय उत्तरपदार्थप्राधान्यात् प्रश्नानुपपत्तिमाशङ्क्याह

इहेति॥ (कै)

प्राधान्यमिति। (कै)

एवं च समानार्थत्वभङ्ग इति भावः॥ ननु चित्रगुरित्यादिवत् समासे उत्तरपदार्थप्राधान्यम् एकार्थीभावकृतं स्यात् तत्राह

अन्योत्तरेति। (कै)

तद्वैधर्म्यं च भाष्योक्तं किं च वाक्यविपरीतविशेषणविशेष्यभावो नैकार्थीभावः साध्यः। अत एव तस्य एकार्थीभावकृतविशेषेषु भाष्ये गणनाभावः॥

किं प्रधानोऽयं समास इति। (भा)

कालाः परिमाणिना॥ परिमीयते परिच्छिद्यते येन तत्परिमाणन्तदान्परिमाणी। परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते स तत्पुरुषः। मासो जातस्य यस्य स मासजातः। ननु जातो देवदत्तः तस्य च दिष्ट्यादिपरिच्छेदकं न तु कालः। तस्य क्रियामात्रपरिच्छेदकत्वादिति

"कालाः परिमाणिना"॥ 'सामर्थ्यात्परिमाणवचना इति'। परिमाणमपेक्ष्य परिमाणी भवति नान्यथेत्येतत्सामर्थ्यं, तच्च यद्यपि कालः प्रस्थादिवत्सर्वतो मानं न भवति तथापि परिच्छेदहेतुत्वात्परिमाणमित्यु-

समासपदं विग्रहपरमपि उत्तरपदार्थप्रधान इत्युत्तरमणुभयसाधारणम्। न च विग्रहेऽपि जातस्य प्राधान्ये जातस्य मास इति षष्ठ्यनुपपत्तिः। विशेषणादेव षष्ठीविधानादिति वाच्यम्। वृत्तिविग्रहयोः समानार्थत्वानुरोधेन तस्य वाक्यस्य वृत्त्यर्थबोधकत्वविवक्षायां विशेष्यविशेषणभाववैपरीत्येऽपि पूर्वजातसंस्कारानिवृत्तेः। अन्यथा समासे जातप्राधान्येन विशेषणविभक्तिषष्ठ्यापादनस्य भाष्येऽसंगत्यापत्तेः। मम तु न दोषः। विग्रहेऽपि तस्यैव प्राधान्येन तत् स्थितिवत् समासे विशेषोत्तरषष्ठ्या तत्सम्भव इत्याशयात् सम्बन्धस्याशेषत्वान्न षष्ठीत्युत्तरम्॥ भाष्ये

यैवासावन्तर्वर्त्तिनीति। (भा)

उत्तरपद इति शेषः॥

योऽसाविति। (भा)

परिच्छेद्यपरिच्छेदकत्वरूपः॥

चेत्। सत्यम्। साक्षात्क्रियां परिच्छिन्दन्नपि कालस्तद्द्वारा देवदत्तं परिच्छिनत्ति यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते तत्र व्यवहारकालजननक्षणयोरन्तरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येव। विग्रहे षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यमिह बोध्यम। दण्डी चित्रगुरित्यादाविव विशेषणविशेष्यभावव्यत्यासेनैव एकार्थीभावा-

---

च्यते। 'मासो जातस्येति'। कस्य पुनरयं मासः परिच्छेदको न तावज्जातस्य, तस्य हि दिक्प्रादि परिमाणं न तु मासः, नापि जननक्रिया, तस्या एकक्षणभावित्वान्मासेन सम्बन्धाभावात्। उच्यते। जननक्रियावधिर्मासेन परिच्छिद्यते, मासो जातस्येति, कोऽर्थः, जननक्रियाया ऊर्द्धमस्य मासो

स समासे इति । (भा)

षष्ठीप्रयोजको न भवतीत्यर्थः । तदाह

अभिहित इति । (भा)

षष्ठ्यप्रवृत्तौ निमित्तमिदम् । समासेनाभिहितो यतः अत एवान्तर्भूतः ॥ प्रथमोत्पत्तिनिमित्तमाह

प्रातिपदिकार्थे इति । (भा)

हि यतोऽभिहितस्तत एव प्रातिपदिकार्थः सम्पन्न इत्यर्थः । अन्यथा पचतीत्यादौ कर्त्राभिधीयमानो गुणभूतत्वादन्तर्भूतोऽपीति तत्रापि प्रथमा स्यादत इदमुक्तम् । अनभिहितसम्बन्ध एव षष्ठीति तात्पर्य्यम ॥

अन्तर्भावादिति । (कै)

सम्बन्धिविषयकोपस्थितिविषयत्वादित्यर्थः ॥

अनुद्भव एवेति । (कै)

पृथगुपस्थित्यविषयत्वसम्बन्धित्वमनुद्भवः ॥

भ्युपगमात् । तथा च हरिणा । क्व चिद् गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्य,

आख्यातं तद्धितार्थस्य यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः ॥

इति, वदता आख्यातिकवैयाकरणाद्युदाहरणानि स्पष्टीकृतानि । तथा

जातः, अतीते मासेऽस्य जननमिति यावत्, अनेन प्रकारेण मासो जातस्य परिमाणं, यथा मासे देयमृणमिति ऋणदानस्यावधिर्मासेन परिच्छिद्यते ।

[1]प्रथमोत्पत्तिनिमित्तमिति। (कै)

षष्ठीप्रतिबन्धद्वारा इत्यर्थः॥ ननु पक्व इत्यादौ तत्त्वेनाभिधीयमानं कर्मादिकर्त्रभिहितमित्युच्यते नैष तथासम्बन्धत्वेनाभावादत आह

गुणभावेनेति। (कै)

सम्बन्धाभिधानमेव भवतीत्यर्थः। सम्बन्धिविषयकोपस्थितिविषयत्वमेव गुणभाव इत्याहुः॥ ननु

क्वचिदन्तर्भावमिति। (कै)

न सम्बन्धिविषयकोपस्थितौ विषयो भवतीत्यर्थः। उभयोः पृथगुपस्थितयोरेव सम्बन्धसम्भवादिति भावः॥

विवक्षितोऽर्थ इति। (कै)

कियान् कालोऽस्य जातस्य इति प्रश्ने जातस्य मास इत्युत्तरेणैवाकाङ्क्षा शान्तिः। न तु मासस्य जात इति उत्तरेणेति स एव विवक्षितोऽर्थः स च न ततः प्रतीयत इति भावः॥

---

१ उपलब्धकैयटे तु "प्रथमोत्पत्तिनिमित्तकथनम्" इति पाठोऽस्ति॥

च मासजात इत्यस्य मासप्राग्भाविजननाश्रय इत्यर्थः। अत एव मासजातो दृश्यतामित्यादिक्रियायोगो जातस्यैव भवति न तु अर्धपिप्पल्यादाविव पूर्वपदार्थस्य। द्व्यहजातः। द्वयोरह्नोः समाहारः। राजाहः सखिभ्यष्टच्। नसंख्यादेः समाहार इत्यह्नादेशप्रतिषेधः। कथन्तर्हि

'मासजात इति'। यथा गावोऽस्य सन्तीति गोमानिति वाक्ये षष्ठीनिर्दिष्टस्यापि तद्धितो वृत्तौ प्राधान्यं, तत्तस्य हेतोः, अभिहितः षष्ठ्यर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति, यथा चित्रा गावोऽस्य चित्रगुः पुरुष इति

[1]मास जात इति। (कै)

समासस्य त्वार्थमुत्तरत्वं बोध्यम्॥ नन्वेवं विग्रहे षष्ठीसमासेनैव सिद्धौ सूत्रं व्यर्थम् उत्तरं तु तवेव समाप्यर्थमेवेति चेन्न। एतद्भाष्यप्रामाण्येन परिच्छेद्यपरिच्छेदकसमभिव्याहारे परिच्छेद्यबोधकादेव षष्ठीति स्वीकारात्। अवयवावयविनोः समभिव्याहारे यथावयविवाचकादेव तत्रार्थे जातमास इत्यनिष्टनिवृत्त्यर्थं सूत्रम्॥

शब्दशक्तिस्वाभाव्यादिति। (कै)

यद्यपि एतद्भाष्यात् "[2]तद्वहति" इति सूत्रभाष्याच्च वृत्त्यर्थोपदर्शके विग्रहवाक्येऽपि तत्समानेव विषयतेति लभ्यते। तथाप्यत्र वाक्यपदमर्थबोधाय प्रयुक्तस्वतन्त्रवाक्यपरमिति बोध्यम्। भाष्येऽप्येवमेव॥

सत्ताया नित्यत्वादिति। (कै)

नित्यत्वमत्र परिच्छेदककालाधिककालस्थायित्वं बोध्यम्॥

---

१ "मासस्य जातः" इति पाठोऽस्ति॥

२ अ ४। पा ४। सू ७६॥

ह्यङ्गजात इति। उच्यते। नायं समाहारे द्विगुः किन्तूत्तरपदे द्वे अहनी जातस्य यस्येति त्रिपदतत्पुरुषाभ्युपगमात्। ननु सुपसुपेत्येकत्वस्य विवक्षितत्वात्कथमेतदिति चेत्। वचनादित्येहि। उक्तं हि वार्त्तिककृता। उत्तरपदेन परिमाणिना द्विगोः समासवचनमिति॥ अस्यार्थः। परिमाणिवच-

---

बज्ञत्रीहाविति तद्वदत्रापि वाक्ये षष्ठीनिर्दिष्टस्यापि तद्वतो जातस्य वृत्तौ प्राधान्यं द्रष्टव्यं, तथा च मासजातो दृश्यतामिति क्रियायोगो जातेऽस्यैव भवति न पुनरर्द्धपिप्पल्यादिवत्पूर्वपदार्थस्य। 'द्यहजात इति'। द्वयो-

इत्यभिप्रायेणेति । (कै)

जातसम्बन्धीकालो मास इत्यभिप्रायः ॥ भाष्ये

वदराणामिति । (भा)

देवदत्तसम्बन्धिवदराणामित्यर्थः ॥

कालशब्देनेति । (कै)

कालपरिमाणमिति षष्ठीतत्पुरुषः ॥ अत्र व्याख्यानि वार्त्तिकस्थ-कालपदार्थयोः स्वरसत ऐक्यं प्रतीयमानं भज्यते इत्यत आह

अथवेति । (कै)

अत्र पक्षे कालपरिमाणमिति बहुव्रीहिः ॥

तद्यस्येति । (कै)

तत् कालसमानं जातमपि प्रतीतिजननक्रियापरिच्छेदद्वारा इत्यर्थः ॥

तरुतृणेति । (कै)

पदार्थानामनन्यथासिद्धत्वध्वपेक्षयानुमेयः काल इति भाष्या-शय इति भावः ॥

नेनोत्तरपदेन द्विगोः सिद्धये समासो वक्तव्यः । अर्थाद् द्वयोर्युगपदिति गम्यते । तथा च वचनाद्बहुनामप्ययं तत्पुरुषो भवति एवं द्वौ मासौ जातस्य पूर्वयोस्तत्पुरुषे सति कालान्ते द्विगाविति पूर्वपदप्रकृतिस्वरो भवति द्वयो-

---

रह्नोः समाहारः 'राजाहः सखिभ्यष्टच्' 'न संख्यादेः समाहारे' इत्यह्ना-देशस्य प्रतिषेधः । कथं तर्हि द्व्यह्नजात इति, द्वे अहनी अस्य जातस्येति त्रयाणां पदानां युगपदनेन समासे कृते जातशब्दउत्तरपदे परतः पूर्वयो-

[1]प्रत्ययान्तरम् । (कै)

कारणान्तरम् ॥

तस्यैकत्वादिति । (कै)

अखण्डकालाभिप्रायमिदम् । वस्तुतस्तु एकत्वे तस्य कार्य्यवैचित्र्यनियामकत्वानुपपत्तिरिति भाष्योक्तलक्षणानुपपत्त्या क्षणधारारूपः कालः इति युक्तं क्षणानां चाक्षुषविनाशित्वात् । कथमहरादिविभाग इति चावतरणं युक्तं कैयटेऽपि नित्यः । प्रवाहनित्यतया एकः समूहरूपेण विभुः क्षणस्य विभुत्वात् । तस्य समूहस्यैकत्वाद् इत्यर्थ इत्यन्ये ॥

इत्याहेति । (कै)

इति हेतोराह इत्यर्थः ॥ भाष्ये

तस्यैवेति । (भा)

बुद्धिविषयक्षणसमूहस्येत्यर्थः ॥

क्रिययेति । (कै)

क्रियासमूहेनेत्यर्थः ॥ नन्वौपाधिकत्वेऽपारमार्थता स्यादत आह

---

१ "प्रत्ययान्तराविशेषेऽपि" इत्यपि ॥

र्मासयोः समाहारो द्विमासम् । मात्रादिः, द्विमासं जातस्येति तु विगृह्य समासे क्रियमाणे सतिशिष्टत्वात्समासान्तोदात्तत्वं स्यात् । स्यादेतत् । यावद्वचनं वाचनिकमिति परिमाणिमात्रेण चिपदतत्पुरुषः । अन्यत्र तु

र्द्विगुर्भविष्यति । ननु च 'सुप्सुपे' त्येकत्वसंख्याया विवक्षितत्वाद् द्वयोर्द्वयोः समासो न बह्वनां युगपत् । उच्यते । वक्ष्यमेवैतद् उत्तरपदेन परि-

परोपाधिक एवेति। (कै)

व्यवहारमात्रस्यैवाधिकत्वाद्यावद्व्यं प्रामाण्यमङ्गीकार्य्यमिति भावः॥ अत्रार्थे वृद्धसम्मतिमाह

[1]तथाचेति॥ (कै)

तस्य (हरिः)

क्षणसमूहरूपकालस्य॥

आत्मा। (हरिः)

स्वरूपम्॥

धर्मान्तराश्रयैः। (हरिः)

---

१ तथाचोक्तं हरिणा—

तस्यात्मा बहुधाभिन्नो भेदैर्धर्मान्तराश्रयैः।
न हि भिन्नमभिन्नं वा वस्तु किञ्चन विद्यते॥ १॥
नैको न चाप्यनेकोऽस्ति न शुक्लो नापि चासितः।
द्रव्यात्मा स तु संसर्गादेवं रूपः प्रकाशते॥ २॥
संसर्गिणान्तु ये भेदा विशेषास्तस्य ते मताः।
संभिन्नस्तैर्यवस्थानां कालो भेदाय कल्पते॥ ३॥

द्विपद एवेति स्थितम्। तथा च कथं "त्रिलोकनाथेन सतां मखद्विष" इति कालिदासः। "नवरसरुचिरमिति" च काव्यप्रकाशकारः। इह हि त्रिलोकनवरसशब्दयोर्न तावद्विशेषणं विशेष्येणेति समासः। दिक्संख्ये संज्ञा-

---

माणिना द्वयोः समासवचनमिति परिमाणिवचनेनोत्तरपदेन द्विगोः सिद्धये समासो वक्तव्यः, अथ द्वयोर्युगपदिति गम्यते, तस्माद्वचनाद्बहुनामप्ययं

धर्मी । सूर्य्यः । तद्वृत्त्यन्तरं धर्मान्तरं धर्मविशेषः क्रियारूपः स आश्रयो येषां तैः क्रियाश्रितैः । भेदैः । विशेषैः । बहुधा अहरादि-भेदेन न केवलं कालस्यैव भेद औपाधिकः किं तु सर्वस्यापीत्याह

न हीति ॥ (हरिः)

भेदाभेदौ । एकत्वानेकत्वे । शुक्लत्वकृष्णत्वे । इत्यादिसर्वमपि न कस्य चित् स्वाभाविकमित्यर्थः । तदुक्तं न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसम्बन्धात्तु गौरिति । किन्त्वौपाधिकमेव इत्याह

द्रव्यात्मेति । (हरिः)

द्रव्यपदार्थस्तत् तत्संसर्गादिकत्वानेकत्वादिना व्यवहारविषय इत्यर्थः । एवं च ब्रह्मैव कल्पित तत्तत्पदार्थसंसर्गादभेदैकत्वानेकत्व-शुक्लत्वकृष्णत्वादिना भासते इति भावः । वस्तुतस्तत्तु सर्वधर्मविनि-र्मुक्तमिति बोध्यम् ॥ प्रकृते आह

संसर्गिणां त्विति । (हरिः)

आदित्यक्रियादीनां ये भेदा विशेषास्ते एव तस्य कालस्य विशेषा अहरादिविशेषव्यवहारहेतव इत्यर्थः । तैर्भिन्न स्वरूपः

यामिति नियमात् । नापि समाहारे द्विगुः । द्विगोरितिङीप्प्रसङ्गात् । न च पात्रादित्वं कल्प्यम् । त्रिलोकीति प्रयोगस्यासाधुतापत्तेः । तथा च परि-शेषात्त्रिपदत्वपक्ष एवावशिष्यते द्विमासजातः । त्रिपदे तत्पुरुषे जातशब्दे

समसो भवति । एवं द्वौ मासौ जातस्य द्विमासजातः त्रिपदे तत्पुरुषे जात-शब्दउत्तरपदे परतः पूर्वयोस्तत्पुरुषे सति कालान्ते द्विगावपि पूर्वपद-प्रकृतिस्वरो भवति । द्वयोर्मासयोः समाहारो द्विमासं, पात्रादिः, द्विमासं

कालो व्यवस्थानाम् अहरादिव्यवहाराणां भेदाय विशेषाय कल्पित इत्यर्थः॥

क्रियाया एकत्वादिति। (कै)

गच्छतीत्यादितस्तयाप्रतीतेरिति भावः॥

आख्यातेन त्विति। (कै)

स्वतो निवृत्तभेदैवेत्यर्थः॥ अन्ये तु दिनपर्य्यन्तस्थायिक्रियानुपलम्भात् प्रश्नः

कयेति। (भा)

आदित्यगत्येति उत्तरम्। तत्क्रियासमूहस्य तावत्कालं धारारूपेणानुसूतत्वादित्यर्थ इत्याहुः॥ ननु क्रियापरिच्छेदकत्वमेव कालस्य न तु द्रव्यपरिच्छेदकत्वं द्रव्यस्य हि वितस्त्याद्येव परिच्छेदकमत आह

जातस्य जननक्रियावधिरिति। (कै)

मासो जातस्य इत्यस्य जननक्रियाया ऊर्ध्वमस्य मासो जात इत्यर्थ इत्यभिप्रायः। एवं च जननक्रियापरिच्छेदद्वारा जातपरिच्छेदकत्वमिति तात्पर्यम्॥ मासस्य परिच्छेद्यान्तरमुक्तं निराकरोति

उत्तरपदे परतः स चोक्तरीत्यादुष्ट एवेति। अत्रोच्यते लोकशब्दोऽत्र समुदायपरः। तथा च त्र्यवयवो लोक इति मध्यमपदलोपी तत्पुरुषः। इदञ्च

जातस्येति विग्रहे समासे क्रियमाणे सति शिष्टत्वात्समासान्तोदात्तत्वं स्यात्, इह मासो जातस्य मासा जातस्येति द्विवचनबहुवचनान्तानामयं

न च मासेति ॥ (कै)

चिंशद्वाच्च (कै)

इति बहुव्रीहिः। यद्यनाभवत् पृषोदरादिलेनाकारान्तता-समूहोऽन्यपदार्थः। समाहारद्विगौ "संख्यापूर्वो रात्रं क्लीवम्" इति नपुंसकतापत्तेः ॥

न च कालसामान्यमिति। (कै)

तस्य नित्यत्वाद्विभुत्वाच्चेति भावः। क्षणपक्षे तद्वाराऽविच्छेदेन तस्यानन्तत्वादपरिच्छेद्यत्वमिति भावः ॥ युक्त्यन्तरमप्याह

न वस्त्वन्तरस्येति। (कै)

एवं च क्रियाद्वारैव कालपरिच्छेदकत्वं वाच्यमिति तद्वारा जातपरिच्छेदकत्वमेवेति भावः ॥ ननु संख्याविशेषैकत्वादगतिरिति न इत्यत आह

एकत्वं त्विति ॥ (कै)

तथाभूतत्वात्। (कै)

नियतपरिच्छेदकपरिमाणवाचित्वात्। अन्यथा जातस्य अस्य कियान् काल इति प्रश्नेऽस्योत्तरत्वं न स्यादित्यर्थः ॥ नन्वेवं सति तात्पर्य्ये द्वित्वाद्यवगतिरपि स्यादत आह

"द्विगोर्लुगनपत्य" इत्यत्र भाष्य एव स्पष्टम्। त्रयाणां लोकनाथ इति वा। नवरसा चासौ रुचिरेति बहुव्रीहिगर्भः कर्मधारयोऽपि सुवचः। प्रकृतमनुस-

---

समासो भवति, वृत्तौ विभक्तौ निवृतायां द्वित्वबहुत्वावगतौ प्रमाणाभावाद् अभेदैकत्वसंख्याप्यत्र न भवति शुद्धमेव त्वेकत्वं गम्यते, यत्र द्वयोर्बहुष

बहिरङ्गेति।

दिवादिप्रतीतेरनुभवविरुद्धत्वाच्चेत्यपि बोध्यम्॥

शौर्पिक इति।

परिमाणमत्रपरिमाणत्वम्। उपाधिमाश्रित्य संख्या। एकत्वरूपा। भेदेन। तद्रूपेण। भासते इत्यर्थः॥ अत्र परिमाणवाचकस्थले तथैव व्युत्पत्तिरिति तात्पर्य्यम्। वस्तुतः समासे एकत्वमपि नैव भासते किन्तु मासत्वेनैकमासस्यैव भानं न त्वनेकस्यानभिधानादिति भाष्याशयः। एवं शौर्पिकतावको नादावपीत्यं बोध्यम् इदमनभिधानम् "समर्थ" सूत्रे (२। १। १) उक्तम्। एकार्थीभावकृतविशेषनिरूपणावसरे। तुल्यन्यायाद् "अत्रश्लोका" (२। १। १०) इति सूत्रस्थमेकवचनान्तयोरित्यपि प्रत्याख्यातं बोध्यम्[1]॥

---

१ शौर्पिके मासजाते च परिमाणं स्वभावतः।
उपाधिभूतमाश्रित्य सङ्ख्याभेदेन वर्त्तत इति॥

रामः। राजपुरुषः इत्यादौ यद्यप्यभेदैकत्वसंख्या भासते तथापि मासजाते न तथा किन्तु शूर्पेण क्रीतः शौर्पिक इत्यत्र शूर्पस्येव मासस्य मुख्यमेवैकत्वम्। अत्रपरिमाणस्य वाचके तथैव व्युत्पत्तेरिति ध्येयम्॥

वानुसूत एकः शब्दार्थस्तत्रैवाभेदैकत्वसंख्या मासशब्दस्यत्रपरिमाणमर्थमाचष्ट इति द्वित्वबहुत्वावगतौ विभक्तिमपेक्षते स्वतस्त्वेकत्वस्यैवासाधारणः॥

नञ्। २। २। ६॥

शब्दार्थावगतेर्द्वैद्व्यवहाराधीनत्वेऽपि न्यायव्युत्पादनाय विचार इत्याह

इहेति॥ (कै)

प्रक्रियागतेति। (कै)

लिङ्गसङ्ख्यादिभिर्द्वित्वतदभावरूपगुणदोषेत्यर्थः॥

असत् सामान्यम्। (कै)

अभावो भेदः तस्यामत्वं निरूपयितुमशक्यत्वात्। तथाहि। भिन्नाभ्यां हि धर्मि प्रतियोगिभ्यां स निरूप्यः तत्रायमेव स चेत् आत्माश्रयः। अन्यश्चेदन्योऽन्याश्रयः। तृतीयादेरन्यस्य स्वीकारे चक्रकमनवस्था चेति। तत्रान्तरे स्फुटं सामान्यत्वं च केवलान्वयित्वात्॥

नञ्॥ नञ् सुपा सह प्राग्वत्। अब्राह्मणः। अतृषलः। उत्तरपदार्थप्रधानोऽयम्। तथाहि। आरोपितत्वं नञा द्योत्यते। तच्चोत्तरपदप्रवृत्ति-

---

"नञ्"॥ विभक्तिञकारयोर्विशेषाभावाद् ञकारोच्चारणं, सुपा नञ्शब्दस्य विशेषणात्यामादिलक्षणस्य नस्यासुबन्तत्वादेवाग्रहणं सिद्धम्। इहाब्राह्मणादिशब्दैः क्षत्रियाद्यभिधानमिष्यते तत्र जातिमात्रपरे ब्राह्मणशब्दे न विद्यते ब्राह्मण्यं यस्य सोऽब्राह्मणः क्षत्रियादिरित्यन्यपदार्थप्रधानः

[1]तद् वृत्तिः। (कै)

तद्वद् वृत्तिः। एवं च ब्राह्मणभिन्न इत्यर्थः फलितः॥

दुरुपदेशः (कै)

अमुष्मिन्नवकाशे ब्राह्मणमित्यादिः॥

मिथ्याज्ञानम् (कै)

प्रकारान्तरेण भ्रमः। ब्राह्मणपदार्थो ब्राह्मणान्तस्य स्वाभाविकी निवृत्तिर्मुख्यब्राह्मणाभावो द्योत्यते इति वक्ष्यमाणा आरोपिततद्वृत्ति-द्योतको नञ् इत्युक्तं भवति॥

यद्यपीहेति। (कै)

इह सूत्रे ऽचार्थे तत्पुरुषसंज्ञेति न निर्दिष्टमित्यर्थः॥

यदि च नञेति। (कै)

यदि नञा ब्राह्मणार्थः प्रतिषिध्यते स्वार्थप्रतिषेधे रूपाभाव-विशिष्टो बोध्यते तदाभावप्रतियोगी ब्राह्मण इत्यर्थे सर्वात्मना ब्राह्मणेतरव्यावृत्तस्य नञर्थस्याभावात् किं निरूपितं परिच्छेद्यत्व-

---

१ उपलब्धकैयट पुस्तके "तद्वृत्तिः" इति पाठो नास्ति॥

निष्ठम्। तथा चारोपितं यद् ब्राह्मणत्वं तद्विशिष्टे समासः शक्तो विशेषण-विशेष्ययोः संसर्गस्यारोप एव तेन ब्राह्मणाभिन्नत्वबोध आर्थः। अत

समासो भवति तच्च नाप्राप्ते बहुव्रीहावारम्भादनेन तस्य बाधनाद्ब्राह्मणको देश इत्यपि न सिद्ध्यति, न हि प्रवृत्तिनिमित्तमात्रनिष्ठेषु ब्राह्मणादिशब्दे-ष्वयं समासो न तद्विशिष्टेष्विति नियामकमस्ति, इह चावर्षा हेमन्त इति हेमन्तस्य यद्वचने तत्समासस्य प्राप्नोति, लिङ्गे तु परबल्लिङ्गमिति वचना-

रूपप्राधान्यं स्यात् । अभावप्रतियोगित्वादेः केवलान्वयित्वात् ॥

तदेवाह

तद्गतविशेषावचनान्नञर्थक एवेत्यादि ॥ (कै)

नञ्वनर्थकत्वे साधुत्वं न स्यादत आह

अन्वाख्यानाद्वीति ॥ (कै)

द्वन्द्वैकदेशिसमासयोरिति । (कै)

उपमितसमासः समानलिङ्गयोरेवेति भावः ॥

अब्राह्मणको देश इत्यादि न सिध्यतीति । (कै)

नहि प्रवृत्तिनिमित्तमात्रनिष्ठेषु ब्राह्मणादिशब्देष्वेवायं समासो न तद्वन्निष्ठेष्वित्यत्र नियामकमस्तीति भावः ॥

[1]नञोऽस्त्यर्थानामिति (वा)

तत्सूत्रस्यवार्त्तिकादिविषयविभागो लक्ष्यते । [2]एतत्तदोरिति सूत्रेऽनञ्-समासग्रहणाल्लिङ्गान्नञिति सूत्रविहितसमासे उपसर्जनत्वप्रयुक्त-

---

१ अनेकमन्यपदार्थे (२ । २ । २४) इति सूत्रस्यवार्त्तिकम् ॥

२ अ ६ । पा १ । सू १३२ ॥

एवानुपसर्जनत्वादतस्तिङन्नित्यादिसर्वनामकार्यनिर्वाहः । स्यादेतत् । विघ्ना-नामभावो ऽविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यात् । अव्ययीभावस्तु निर्म-

---

दोषाभावः । इह च असोऽसर्वस्मै इत्युत्तरपदार्थस्योपसर्जनत्वात्त्यदादिकार्यं सर्वादिकार्यं च न स्यात्, यदा त्वसत्सामान्यवर्तमानो नञ् ब्राह्मणादिभिर्विशेष्यते ब्राह्मणत्वेनासत्क्रियान्तरेण तु सन् क्षत्रियादिकोऽब्राह्मण इति तदा पूर्वपदार्थप्रधानं तत्र नञर्थस्य प्राधान्यात्संख्यायोगः समासस्य न स्यात्, वाच-

कार्याभाव इति भाष्याशय इत्यन्ये ॥ ननु नञः पाठेऽपि तदन्तत्वाभावादव्ययत्वाप्राप्तिरित्याह भाष्ये

पाठेनापीति । (भा)

एवं च नञः पाठेनाव्ययतया तदर्थस्य लिङ्गसङ्ख्यानन्वयित्वेन समासेऽपि तदर्थस्य प्राधान्ये स न स्यादिति भावः ॥ भाष्ये

नेदं वाचनिकम् । (भा)

नेदं वचनाप्रयोज्यमित्यर्थः । कैयटेऽपि "प्रयोजनमि"ति करणे ल्युट् ॥

ब्राह्मणाभावस्येति । (कै)

ब्राह्मणभेदस्येत्यर्थः ॥

गुणत्वादिति । (कै)

आश्रितत्वमत्र गुणत्वम् ॥

तद्युक्तेति । (कै)

तद्युक्तद्रव्ये ऽभेदेनान्वयित्वादित्यर्थस्तद्व्यक्ति

त्तिकमित्यादौ सावकाशः । मैवम् । उत्तरपदार्थप्राधान्य एवास्य प्रवृत्तेः । उक्तं हि प्राक् । अव्ययीभावादिमहासंज्ञाव्यवहारेण पूर्वाचार्योक्तार्थनिय-

---

मिको तु परवल्लिङ्गता भवतु । स्यादेतत्, शब्दशक्तिस्वाभाव्यादसत्त्वरूपमर्थं वाक्ये नञ्चाचष्टे समासे तु सत्त्वरूपं, तेन सिद्धः संख्यायोगः, एवमप्यपवादेनानेनाव्ययीभावस्य बाधादमत्तिकमिति न सिद्ध्यति तस्य तु निर्मत्तिकमित्यादिरवकाशः, असो ऽसर्वस्मा इति च पूर्ववत्सामान्यसिद्धिः, अस्तु

यदसौ द्रव्याश्रित इति। (भा)

भाष्ये अयं भावः। भेद एव नञर्थः तस्य चाश्रयेण गुणस्यैव तादात्म्यं सम्बन्धः। अब्राह्मणः क्षत्रियः ब्राह्मणभेदः क्षत्रिये इत्युभयविधव्यवहारदर्शनात्॥

गुणवचनानाम् (भा)

गुणोपसर्जनद्रव्यवाचिनाम्॥

आश्रयतः। (भा)

आश्रयविशेषतो लिङ्गवचनानीत्यर्थः। जात्याश्रयबोधकानां तु नियतलिङ्गतैवेति भावः॥

इह त्वाश्रयेति। (कै)

साक्षाल्लिङ्गसङ्ख्यानाश्रयत्वसेवासत्त्वमिति भावः॥ भाष्ये

यदसौ द्रव्यं श्रित इति। (भा)

यद्द्रव्यान्वयीत्यर्थः॥ उत्तरपदार्थप्राधान्यपरिग्रहस्तुल्यविकल्पाभिप्रायेण न भवतीत्याह

अन्नापीति॥ (भा)

मोऽप्युत्सर्गतः स्वीक्रियत इति। नन्वेवमनुपलब्धिरित्यादौ का गतिः। मृग्। रक्तोष्ट्रागमलब्धसन्देहा इति भाष्यप्रयोगात्यत्ते तत्पुरुषोऽपीष्यते।

तर्ह्यत्रोत्तरपदार्थप्रधानः, यद्येवमब्राह्मणमात्रस्यानयनं प्राप्नोति, यदुत्तरपदार्थप्रधानता तत्र हेतुरिहापि तर्हि राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति, अस्त्यत्र विशेषः, राजा विशेषकः प्रयुज्यते, इहापि तर्हि नञ् विशेषकः प्रयुज्यते, कथं नञ् नाम विशेषकः स्यात्, अनियतगुणस्य

अव्ययीभावस्येति। (कै)

परेतु नञा स नेष्ट एव। [1]असंहितमित्यचारोपितं संधानम्। परः संनिकर्षस्तदभावादद्रुतायां वृत्तौ संहितासंज्ञाप्रयुक्तं कार्यं न प्राप्नोतीत्यर्थ इति न दोषः। अत्यन्ताभावार्थकनञः क्रियागुणमाचान्वयित्वेनामक्षिकमित्यादावसंहितमित्यादावुत्तरपदार्थाभावाप्रतीत्याऽव्ययीभावाप्राप्तेश्च। अनञ्समासग्रहणात् स्त्र्याद्यादिसिद्धिरप्युक्तेति तुल्यविकल्पाभिप्रायेणैव भाष्यम्॥

अवर्षाद्धेमन्तः (कै)

इत्यपि प्रतियोगिरूपाश्रयगतलिङ्गादिग्रहणात्सिद्धमभावेन प्रतियोगिनोऽपि स्वज्ञानाश्रयेण तस्याप्याश्रयत्वात्। स्वघटितसमासघटकत्वेनोपस्थितत्वाच्चास्यैवाश्रयस्य ग्रहणमन्यथा तद्दोषदूषितपक्षोऽर्धमाश्रितेऽपि तद्दोषानुवृत्तौ भाष्यस्य निर्दलतापत्तिः। अथवा पुनरस्त्युत्तरपदार्थप्रधान इति ममकक्षतया पक्षान्तरकथनस्यासङ्गतिश्चेति वदन्ति॥ अनेकमित्यादौ वचनदोषं तु भाष्यकृदेवाग्रे वक्ष्यति। भाष्ये

---

१ परः संनिकर्षः संहिता चेद् अद्रुतायामसंहितम् (१। ४। १०२) "परः संनिकर्षः संहिता" एतत् सूत्रस्यवार्त्तिकम्॥

अत एव भूवादिसूत्रे (१। ३। १) "अथासंहितया" इति विरामोऽवसानमिति" (१। ४। ११०) सूत्रे तु "अद्रुतायामसंहितमिति" (वस्तुतः

गुणविशेषप्रतिपादनाय हि विशेषणं प्रवर्त्तते न तदुपघाताय नञा च ब्राह्मणार्थः प्रतिषिध्यमानः सर्वात्मना प्रतिषिध्यत इति कथमसतः प्राधान्यं स्यात्, तस्मादुत्तरपदार्थप्राधान्यमिच्छतास्मिन्विषये नञनर्थकोऽन्वाख्यान-

ब्राह्मणमात्रस्येति। (भा)

अभावो नञर्थः। सविशेषणं चेद् अभावप्रतियोगी भेदप्रतियोगी वा ब्राह्मण इति बोधस्तथासति यत्किञ्चिन्निष्ठाभावप्रतियोगिनस्तादृग्भेदप्रतियोगिनो वा ब्राह्मणस्यैवानयनं प्राप्नोतीत्यर्थः॥ "मात्र"शब्देन न शौचाचारादिहीनब्राह्मणस्य नापि क्षत्रियादेरित्यर्थबोधनम्॥

राजा विशेषक इति। (भा)

यद्यपि पुरुषमात्रस्यैवानयनं दृश्यते न राजविशिष्टस्य तथापि राजसंबन्धिन एवानयनं न यत्किञ्चित्संबन्धिन इति राजा पुरुषस्य विशेषक इति भावः॥

नञ्विशिष्टस्येति। (भा)

नञ्द्योत्यारोपितब्राह्मण्यविशिष्टस्येत्यर्थः॥

कः पुनरिति। (भा)

अभावस्यैव नञर्थत्वेन प्रसिद्धत्वात्प्रमितोत्तरपदार्थव्यतिरिक्तः कोऽसौ नञ्विशिष्ट उत्तरपदार्थ इत्याशयः॥ ननु नञर्थस्य

परःसन्निकर्षः संहिता। १। ४। १०९। इति सूत्रे उक्तपाठोक्त्या) द्विधापि भाष्यवार्त्तिकयोः प्रयुक्तम्। यद्वा। अनुपलब्ध्यसन्देहादावपि लाक्षणिक आर्थो वा तदभावबोधः। स्यादेतत्। अन्यपदार्थप्राधान्येऽयं समासः।

सामर्थ्यात्तु साधुत्वमेवंभूतस्यार्थवदनर्थकावयवस्य समासस्येति वाच्यं ततश्च ब्राह्मणमात्रस्यानयनं प्राप्नोति। नैष दोषः। निवृत्तपदार्थकोऽत्र ब्राह्मणशब्दः, सा च निवृत्तिः स्वाभाविकी नञा द्योत्यते, कोऽर्थः, केवलो ब्राह्मणशब्दः प्रयोज्यमानः प्रसिद्धिवशान्मुख्यमेव ब्राह्मणमाचष्टे नञ्प्रयोगेण तु

विशेषणत्वे किं भेदप्रतियोगी ब्राह्मण इत्यर्थः। उक्तभेदानुयोगी ब्राह्मण इति भेदे प्रतियोगी चोपस्थितब्राह्मण एवेति। नाद्यः। ब्राह्मणमात्रस्यानयनापत्तेः। नान्त्य इत्याह

भावाभावयोरिति। (भा)

ब्राह्मणत्वब्राह्मणप्रतियोगिकभेदयोरित्यर्थः॥ कप्रत्ययप्रयोग-सूचितबहुव्रीहिसूचितमर्थमाह

निवृत्त इति॥ (कै)

सर्वथा निवृत्तपदार्थत्वे विशेषणमेव न युज्येतेत्यत आह

सादृश्यादिनेति। (कै)

आदिना सादृश्यादिनिवृत्तमुख्यब्राह्मणादिरारोपितत्वान् इति भाष्याक्षरार्थः॥ तदाह

नञ्द्योतिततद्वत्स्थ इति। (कै)

एवञ्चारोपितस्वप्रवृत्तिनिमित्तवानुत्तरपदार्थ इत्यत्र तात्पर्य-ग्राहको नञिति तात्पर्यम्। उत्तरपदार्थस्य प्राधान्यमप्येतदेवेति बोध्यम्॥

भावप्रधानो ह्यत्र निर्देशः। न ब्राह्मणत्वं यस्मिन्नित्यर्थादुन्मत्तगङ्गादावव्ययी-भाव इवेह तत्पुरुषो बहुव्रीहेर्बाधक इति। फलन्तु अकर्तर्यभोक्तृ-

---

क्षत्रियादौ सादृश्यादिना निमित्तेनाध्यारोपितं ब्राह्मणं न तात्त्विकमिति द्योत्यते, तदेवं मुख्यो ब्राह्मणशब्दस्यार्थो निवृत्तः जातस्यामुख्यः क्षत्रियादि-रिति न ब्राह्मणमात्रानयनं नापि न कस्य चिदानयनमिति सिद्धम्, उक्तं च।

यदा पुनरिति । (भा)

या ऽस्योत्तरपदस्य मुख्यार्थप्रत्ययत्यागपूर्वकमारोपितप्रवृत्तिनिमित्तकार्थबोधकता सा स्वभावसिद्धेति नञ्वचनेन प्रक्त्यारोपितत्वस्य वाचकः सन्मुख्यपदार्थप्रत्ययं निवर्त्तयतीति प्रश्नस्तद्ध्वनयन्नाह

इदानीमिति ॥ (कै)

किं स्वयमिति । (कै)

निवृत्तस्य मुख्यब्राह्मणपदार्थस्य ब्राह्मणत्वस्य निवृत्तिस्तत्पूर्वकमारोपितत्तद्बोधकत्वं द्योत्यते । अथ स्थितस्यैव मुख्यब्राह्मणस्य बोधनिवृत्तिस्तत्पूर्वकं तद्वृत्त्यारोपितत्वं नञा प्रक्त्योच्यत इत्यर्थः ॥ ननु नञ आरोपितत्वे प्रक्तावपि ब्राह्मणादिपदैर्बोधस्य मुख्यब्राह्मणादेः कथं बोधोऽत आह

मन्त्रेणेवेति । (कै)

नञ्सामर्थ्यादेव तन्निवृत्तिरित्यर्थः ॥

नास्ति नञ इति । (कै)

प्रकरणादिकं च तात्पर्यग्राहकं भविष्यतीति भावः ॥

त्यादौ नवृतश्चेति कवभावः स्यात् । मैवम् । अतस्मिन्नित्यादौ सर्वनामकार्यगणकार्ययोरसिद्धिप्रसङ्गात् । अवर्षा हेमन्त इत्यत्र हेमन्तस्येव तद्वि-

---

'प्राक् समासात्पदार्थानां निवृत्तिर्द्योत्यते नञा ।
स्वभावतो निवृत्तानां रूपभेदादलक्षिता' ॥

इति । स्यादेतत्, अर्थप्रत्यायनाय शब्दः प्रयुज्यते ब्राह्मणार्थश्चेन्निवृत्तः किं मुधा ब्राह्मणपदं प्रयुज्यते, तन्न, असति ब्राह्मणपदे नञ्येतावत्

पदार्थनिवृत्ताविति । (कै)

पदार्थप्रत्ययनिवृत्तावित्यर्थः । स्वशक्त्यारोपितत्वबोधेऽपि ब्राह्मणादिपदानां स्वशक्त्यार्थबोधकत्वनिवृत्तिर्वचनं विना न शक्या किं च वचनेनापि तत्कर्त्तुमशक्यमित्युपहासः ॥ भाष्ये

पदार्थान्निवर्त्तयतीत्यस्य (भा)

पदार्थप्रत्ययानित्यर्थः ॥ अमुमेवार्थमाकाङ्क्षापूर्वकं दर्शयति

नन्वित्यादिना ॥ (कै)

ननु शब्दस्य पदार्थनिवृत्तिकरत्ववत्तत्प्रत्ययनिवृत्तिकरत्वमप्यनुपपन्नम् । किं चैवमुत्तरपदार्थप्रत्यय एव न स्यादित्यत आह

अयमत्रार्थ इति ॥ (कै)

निवृत्तपदार्थकतेति । (कै)

निवृत्तमुख्यप्रवृत्तिनिमित्तप्रत्ययकत्वस्यारोपितप्रवृत्तिनिमित्तकप्रत्ययकतेत्यर्थः ॥ पुनर्दार्ढ्यायोक्तमेव स्मारयति

पदार्थशब्देनेति ॥ (कै)

ब्राह्मणप्रत्ययस्य । (कै)

मुख्यब्राह्मणप्रत्ययस्येत्यर्थः ॥ अनेन द्योतकानां प्रसिद्धार्थशक्त्य-

---

प्रेषणस्याप्येकवचनापत्तेश्च । अधनो ब्राह्मण इत्यादावपि न्यायसाम्यात्तत्पुरुषपरत्वस्वीकृतापत्तेश्चेति दिक् । मतान्तरन्तु

त्यच्यमाने कस्यार्थो ऽत्र निवर्त्तयितुमिष्ट इति न ज्ञायते ब्राह्मणपदे तु सति तदर्थस्य क्षत्रियादौ मुख्यः सत्ताविरहः प्रतीयते । अन्यदर्शनं, सर्वे एते शब्दा गुणसमुदाये वर्त्तन्ते । स्मर्यन्ते च ।

नुद्बोधपूर्वकमर्थान्तरशक्त्युद्बोधकत्वं स्वभाव इति बोधितं तच्छक्त्यनुद्बोधेनैव तत्पदार्थप्रत्ययनिवृत्तिरिति बोध्यम्॥

अभिप्रायमप्रतिपद्येति। (कै)

केचित्तु यदि नञः शब्दस्य बोधकतासामर्थ्यनिवृत्तिद्योतकत्वं स्यात्तदा तदर्थगतयोद्भूत्वादिसामर्थ्यनिवृत्तिद्योतकत्वमपि स्यादिति भाष्याशयमाहुः॥ ब्राह्मणनिवृत्तेर्नञा ऽनभिधानात्। नञ्निमित्तेत्यनुपपन्नमित्यत आह

क्षत्रियादाविति। (कै)

तादृशब्राह्मणप्रवृत्तिनिमित्तकोऽस्माद् बोध इति भावः। अयमाशयः। तत्तदर्थकाः शब्दा भिन्नाश्च तत्समभिव्याहारे तु तदर्थकोऽयमिति ज्ञायते। इदमेव नञो द्योतकत्वम्॥

नञ्निमित्तात्तूपलब्धिरिति (भा)

भाष्यस्य तत्समभिव्याहारे मुख्यब्राह्मणार्थको नायं किं तु आरोपितब्राह्मणार्थकोऽयमित्युपलब्धिर्निर्णय इत्यर्थः। तदर्थगतबोद्धृत्वादिसामर्थ्यनिवृत्तिद्योतकानां तु नास्य स्वभावादेवेति तात्पर्यम्। आरोपित-

---

"तपः श्रुतञ्च योनिश्चेत्येतद्ब्राह्मणकारणम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव स॥
(अत्रैव भाष्ये) इत्यादिवचनप्रामाण्यात्सर्वे समुदायशब्दाः तत्तद्यक्ति-

---

'तपः श्रुतं च योनिश्चेत्येतद्ब्राह्मणकारणम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः'॥ (अत्रैव महाभाष्ये) इति, तया च श्रुतिः।

लस्य नञ्वाच्यत्वे तु मुख्यब्राह्मणत्ववति गृहीतशक्तिकब्राह्मणपदार्थे तदन्वयो दुरुपपाद इति तदर्थप्रत्ययत्यागो वाच्यः स चाशक्यः शब्दार्थसंबन्धस्य नित्यताहानिरिति दिक् ॥ अमुमेवार्थं पुनः प्रश्न-प्रतिवचनाभ्यां स्पष्टीकरोति

यदि पुनर् इत्यादिना ॥ (भा)

स चेन्निवृत्त इति । (कै)

ब्राह्मणपदशक्यं यत् मुख्यं ब्राह्मणं तस्य निवृत्तौ स्वशक्यस्य बोध्यस्याभावात् तत्प्रयोगो व्यर्थः । अशक्यबोधने तु नञ्मात्रेणापि तदर्थबोधसम्भव इति भावः ॥

प्रतिषेधविषयेति । (कै)

नञो द्योतकतया समभिव्याहृतपदशक्युद्बोधकत्वं वाच्यं तच्च पदान्तरप्रयोगं विना न सम्भवतीति तत्पदोपादानमिति तात्पर्यार्थः। अस्य पदस्य मुख्योऽर्थः प्रवृत्तिनिमित्तरूपो निवृत्तः। गौणश्चोपजात इति विज्ञायेतेति तु भाष्यान्तरार्थः ॥ भाष्ये

नेत्युक्ते सन्देहः स्यादिति । (भा)

समभिव्याहृतपदस्य बोधकत्वाभावात् निवृत्तिरूपार्थस्य प्रति-

भिरिव तदीयगुणसमुदायेष्वप्युपहितायाः सत्तायाः जातित्वात् तथा च अपूर्णो ब्राह्मणोऽब्राह्मण इति सर्वत्राप्युत्तरपदार्थप्राधान्यं निर्बाधम्। अत्र

षट् व्याधयो यं पुरुषं तपन्ति जैह्मो ह्राई औदरो रैतश्च ।
तमश्च धर्म्मः पिशुनश्च पीतः ब्राह्मणस्तं सारार्थं गरुत्मन्निति' ॥

गौरः सुव्याचारः पिङ्गलकेश इत्यादयश्च धर्म्मास्तदेषां समुदाये ब्राह्मणशब्दः, एवं क्षत्रियादिशब्देष्वपि द्रष्टव्यम्। एवं स्थिते समुदायेषु

योग्याकाङ्क्षाया अनिवृत्तेरबोधकत्वेन च तदप्रयोग एव स्यात्। नन्वस्तु वाचकत्वमेवेति चेदेवमपि सन्देहः स्यादिति भावः॥ तदाकारं दर्शयति

कस्य पदार्थ इति। (भा)

कस्य पदस्य पदार्थ इत्यर्थः। अभिधेयपरः पदार्थशब्द इति तात्पर्यम्। सन्देहपदेन निर्णयाभावो विवक्षित इति तत्त्वम्॥

एवं चैतदिति। (भा)

एवमेवैतदित्यर्थः। लक्षणाप्यत्रान्वये। इयमेव यत आरोपितप्रवृत्तिनिमित्तकस्य बोधः। तच्च नञ्समभिव्याहारे निवृत्तमुख्यब्राह्मण्को ब्राह्मणशब्दार्थ इति बुद्धेरारोपिततत्कार्यकत्वं फलतीति बोध्यम्॥ इदानीं प्रकारान्तरेणापि नञो द्योतकत्वं व्युत्पादयति भाष्ये

अथवा सर्व एते इति॥ (भा)

अवशिष्टानामिति। (कै)

तथा च तद्गुणप्रतिपादनाय ब्राह्मणशब्दप्रयोगः। निवृत्तगुणानां निवृत्तिप्रतिपादनाय च नञ्प्रयोग इत्यर्थः। "अयमेव" एवमयं

च लिङ्गम्। एतत्तदोरिति सूत्रे ऽनञ्समासग्रहणम्। एवञ्च अनेकमन्यपदार्थ इत्यादावेकवचनं सिद्धम्। माघश्च। सेव्यतेनेकया सन्नतापाङ्गयेति।

वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायाज्जातिभिन्ने गुणभिन्ने वा यदा ब्राह्मणशब्दो वर्त्तते तदा स्वाभाविकी जातिगुणनिवृत्तिर्नञा द्योत्यते ऽवशिष्टांशसद्भावप्रतिपादनाय ब्राह्मणशब्दप्रयोगः। यद्येवं द्वयोरपि भिन्नविषयत्वप्रसङ्गः, कथं, यस्यांशस्य सद्भावं ब्राह्मणशब्द आह न तस्याभावं

समुदाये इत्यादिभाष्यार्थः। एवञ्च गुणसमुदायवति शक्तस्य ब्राह्मणशब्दस्यार्थे कतिपयगुणाभावप्रतिपादको नञिति भावः॥

[1]तपः श्रुतादिसङ्ग्रहायाह

गुणशब्देनेति॥ (कै)

याजनादिसङ्ग्रहायाह

निदर्शनायेति॥ (कै)

"कर्त्तरि चे"ति समासनिषेधमाशङ्क्याह

शेषषष्ठीसमास इति॥ (कै)

एषां ब्राह्मणोत्पादकत्वाभावादाह

व्यपदेशस्येति॥ (कै)

गुणसमुदायाभाव इति। (कै)

तत्र गौणः प्रयोग इत्यत्र जातिपदवन्नञपि क्वचित्तात्पर्यग्राहक इति भावः॥

---

१ तपः श्रुतञ्च योनिस्त्येतद् ब्राह्मणकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥

कथन्तर्हि पतन्त्यनेके जलधेरिवोर्मय इति। अत्राहुः। अध्यारोपितैकत्वानां प्रकृत्यर्थतया तत्र वास्तवबहुत्वाभिप्रायं बहुवचनं न विरुध्यत इति। अनेकस्यानेकस्येत्येकशेषो वा। यत्तु।

नञाह यस्याभावं नञाह न तस्य सद्भावं ब्राह्मणशब्द आह। नैष दोषः। द्वावप्येतौ समुदायावलम्बिनौ कृतवत्, तद्यथैकदेशप्रकरणाकरणाभ्यामेकमेव वस्तु कृतं चाकृतं च भवति तथेहाप्येकदेशविभागात् समुदाय एव निवृत्त

बाहुल्येनेति । (कै)

तथा चैते गुणा व्यभिचारिण इति भावः ॥

पिङ्गलकपिलकेशः (भा)

इति भाष्ये । एकं पदं पिङ्गलाः कपिलाः केशा यस्येत्यर्थः । यद्वा पिङ्गल इति वर्णः । गौर इत्यस्य तु

"अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते ।
सा गौरी तत्सुतो यस्तु स गौरः परिकीर्त्तित" इत्यर्थः ॥

ब्राह्मण्ये (भा)

ब्राह्मणशब्दार्थगुणसमुदाये ॥

कुर्वन्ति (भा)

केचिल्लौकिका इत्यर्थः ॥ "पूर्वे पञ्चाला" इत्यादि ग्रन्थः पस्पशायां व्याख्यातः ॥ भाष्ये

जातिहीने (भा)

इत्यादि सामान्येनैकवचनं तेनावयवेष्विति प्रागुक्तेन सामानाधिकरण्यमुपपन्नम् ॥

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता ॥

उच्यते एकदेशसद्भावाच्च स एव सन्नभिधीयत इति सर्वमनवद्यम् । इहानेको जन आगत इति ह्यादिष्वेकत्वमारोपितं प्रतीयते मुख्यं तु प्रतिषिध्यते क्वचियादाविव ब्राह्मणमित्येकवचनमेव भवति ह्यादिसंख्या प्रतीयते तदेवमुत्तरपदार्थप्रधान इति स्थितम् । अत्र च लिङ्गम् । एतत्तदोः सुलोपोकोर-

न च भिन्नविषयत्वमिति। (कै)

नञा यत्किञ्चिद्विषयनिवृत्तेर्ब्राह्मणपदेन यत्किञ्चिद्गुणसत्त्वस्य प्रतिपादनेन पूर्वोत्तरपदयोरसामर्थ्यात्समासो न स्यादिति भावः॥

द्वयोरपीति। (कै)

एकदेशनिवृत्त्यादिद्वारासमुदायस्यैव निवृत्त्यादिप्रतिपादनाद-स्येव सामर्थ्यमिति भावः॥ नञ् समभिव्याहारे श्रुतादिगुण-निवृत्तिद्योतनद्वारा जन्मनिमित्तो ब्राह्मणशब्द इति फलतीत्येक-विषयत्वमित्यत्र तात्पर्यम्॥ जात्यारोपस्य निमित्तफले आह

तत्र स्तुत्येति॥ (कै)

भाष्ये

दृष्ट्वाध्यवस्यतीति। (भा)

अध्यवसायाकारो

ब्राह्मणोऽयमिति॥ (भा)

तत उपलभते नायं ब्राह्मण इति प्रत्यक्षमुक्तं तस्य चारोप-मूलकता दर्शिता ब्राह्मत्वाध्यवसायोत्तरत्वोक्त्या

अब्राह्मणोऽयमितीति। (भा)

यथा अब्राह्मणः, अपापं, अनश्वः, अनुदरा कन्या, अपचसि, अधर्म, इति। तत्तु यथायथमार्थिकार्थमभिप्रेत्येति बोध्यम्। [निरूढलक्षणायाः

नञित्यत्र नञ्समासग्रहणम्। अन्यथैतत्तदोरर्थद्वारेण सम्बन्धिनः सोर्लोपो विधीयमानो नैधो ददात्यसौ ददातीत्यत्र कथं प्राप्नुयात्। इह न ब्राह्म-

अस्य तत इत्यादिः प्रयुक्त इति शेषः ॥ अथैकदेशस्येति वक्तव्येऽर्थस्येत्ययुक्तमत आह

अयमत्रार्थ इति ॥ (कै)

एकदेशविगमादिति। (कै)

एवं चोभयप्रतिपादनायोभयप्रयोग इति भावः ॥ भाष्ये

दुरुपदेशादिति। (भा)

असम्यगुपदेशादिति तदर्थः। एतद्भाष्ये "अब्राह्मणोऽयमित्युत्तरं निर्ज्ञातं तस्य भवती"त्यपाठोऽनुपयोगात् ॥

नान्यर्थेति। (कै)

पूर्वपदार्थप्राधान्ये भिन्ने एकत्वानवगतेरेकवचनं न सिध्यतीत्यर्थः। एवमन्यपदार्थप्राधान्येऽपि तदसिद्धिः ॥

[1]एकप्रतिषेधमात्रमिति। (कै)

एको न भोजनीय एको जनो नागत इत्येवं रूप इत्यर्थः ॥

---

१ उपलब्धबहुषु कैयटपुस्तकेषु "एकत्वप्रतिषेधमात्रम्" इति पाठो दृश्यते ॥

शक्तिसमकक्ष्यतया सिद्धान्ते त्वतिरिक्तशक्तेरुक्ततया वृत्तिविशेषे तदर्थान्तर्भाव इति वा कथं चिन्तेयम्। इह न ब्राह्मणस्य भाव इति युगपदेव

णस्य भाव इति भावेन नञा च युगपत्सम्बन्धे विवक्षिते त्वतलौ च प्राप्नुतः जन
सन. चिव
नञ यदि परत्वात्त्वतलौ कृत्वा पश्चात्पुनः प्रसङ्गविज्ञानान्नञ्समासः क्रियते ततस्तत्पुरुषे तुल्यार्थेति कृत्वा पूर्वपदप्रकृतिस्वरेणाद्युदात्तं

बहूनां संप्रत्यय इति। (भा)

एको नागत इत्येव प्रतीतेरिति भावः। ज्ञापकात् प्रसज्य-प्रतिषेधेऽपि तत्समासो जायत इत्यभिप्रायः॥

एकत्वप्रतिषेधमाचक्षमिति (भा)

पाठोऽपाठः॥ भाष्ये

क्रियागुणाविति (कै)

गुणोदाहरणं अनेकस्मिन् रूपं रस इत्यादि॥ एकं न भोजयेत्येक-निषेधाय प्रसज्यनञ्स्य चारितार्थ्यात् कथं बहुत्वावगतिस्तत्राह

निराश्रययोरिति। (कै)

गुणक्रिययोरित्यर्थः॥

एतच्च प्रसज्येति। (कै)

एवं च तदाश्रयेणैकदेशिनः शङ्कायान्तमभ्युपेत्यैव प्रसज्यप्रति-षेधपदार्थनिर्णेतुमुत्तरमुक्तमिति भावः॥

तथानेकशब्देनेति। (कै)

आरोपितैकत्ववानित्यर्थः॥ एवं च पर्युदासपक्षे बहूनां प्रतीतिः सुलभैवेति भावः। तत्र द्वित्वादिनिर्णयस्तु तात्पर्यवशादिति

भावेनारोपितत्वेन च सम्बन्धे विवक्षिते समास एव प्रथमम्। न तु परा-वपि त्वतलौ प्रकृत्यर्थस्य सापेक्षत्वेनासामर्थ्यात्। नञ्समासस्तु प्रधानस्य

पदं स्यात् प्रत्ययस्वरो नञ्स्वरश्चेष्यत इति समासे कृते त्वतलौ कार्यौ आह च, त्वतलभ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थमिति

बोध्यम् ॥ आरोपितैकत्ववत्त्वेनैव बोधाच्चैकवचनासिद्धिः। एवं च "अनेके" इति बहुवचनमसाध्वेवेति बोध्यमिति मञ्जूषायां विस्तरः॥

यच्च तु पूर्वमेवेति। (कै)

तच्च पूर्वं क्रियोपस्थित्यभावाद् नियतसङ्ख्यद्रव्याक्षेपाभावेनैको न तिष्ठतीत्येव बोधपर्यवसनादिति भावः॥ ननु एकमित्यत्र द्वयोर्नञोः प्रकृतार्थगमकत्वात् प्रियस्यैकत्वमेव प्रतीयेत न बहुत्वमत आह

आवाधे इति ॥ (कै)

षष्ठीति। (कै)

आवाधाया अप्रतीतेस्तत्प्रतीतेरनुपयोगाच्चेति भावः। नोस्माकमेकं प्रियं न किं त्वनेकमिति तदर्थः। एवमेको न तिष्ठतीत्यादावेकस्थितिनिषेधेऽपि अनेकस्थितिबोधो द्रष्टव्यः॥ भाष्ये

त्वतल्भ्यामिति। (भा)

पूर्वपदार्थप्राधान्याश्रयेण वार्त्तिकारम्भः। उत्तरपदार्थप्राधान्ये तु असामर्थ्यात् पूर्वं भावप्रत्ययानुत्पत्तिरेवेति तत्सूत्रे भाष्ये स्पष्टत्वादाह

तच्च भावेति ॥ (कै)

सापेक्षत्वान्निर्बाधः। ततश्च सतिशिष्टः प्रत्ययस्वरो लित्स्वरश्च भवति न तु तत्पुरुषे तुल्यार्थेत्ययम्॥

तच्च भावप्रत्ययस्तावत्प्रकृत्यर्थस्य सापेक्षत्वेनासामर्थ्यान्न भवति नञ्समासस्तु प्रधानस्य सापेक्षत्वाद्भवति॥

ईषदकृता । २ । २ । ७ ॥

ननु जातावीषदर्थान्वयासम्भवादेवासमासः सिद्धोऽत आह

यथैकेति ।

[1]"गोचं चे"ति

गार्ग्यत्वस्य जातित्वम् ॥

---

१ "सक्तुदाख्यातगिर्याह्वा गोत्रं च चरणैः सह" "जातेरस्त्रीविषयादयोपधात्" (४ । १ । ६३) एतत् सूत्रस्य वार्त्तिकम् ॥

ईषदकृता ॥ स्पष्टोऽर्थः । ईषत्यिङ्कृतः । नन्वीषद्भक्तमीषदुन्नतमित्यादावव्याप्तिः । ईषद्गार्ग्यादावतिव्याप्तिश्च । सत्यम् । अत एव वार्त्तिककृतोक्तं, ईषद्गुणवचनेनेति । अकृतेत्यपनीय तत्स्थाने गुणवचनेनेति पूर-

---

"ईषदकृता" ॥ ईषद्गुणवचनेनेति वक्तव्यमिति' । अकृतेत्यपनीय सूत्रे गुणवचनग्रहणं कर्त्तव्यमित्यर्थः । अकृतेति चोच्यमान ईषद्गार्ग्य इत्यादावतिव्याप्तिरीषदुन्नत इत्यादावव्याप्तिः स्यादिति भावः । 'ईषद्गार्ग्य इति' ।

गर्ङेरिति । (कै)

"कड मदे" इति भ्वादौ पठितादारन्यपि सिध्यति ॥

यद्यपीति ।

[1]"उणादयो बहुलमि"ति शास्त्रारम्भात्सर्वमौणादिकमव्युत्पन्नमिति नियम इति भावः ।

---

१ अ ३ । पा ३ । सू १ ॥

णीयमित्यर्थः । अतो नाद्यात्यतिव्याप्ती । यद्यपि गर्गापत्यत्वे उत्कर्षापकर्षौ न स्तस्तथापि तदेकार्थसमवायिनां क्रियागुणानान्तौ बोध्यौ । तथा च प्रयुज्यते गार्ग्यतरो गार्ग्यकल्प इत्यादि ॥

ननु च गार्ग्यो भवति वा न वा न पुनरीषद्गार्ग्यः कश्चित्, उच्यते, गार्ग्यत्वेन सह य एकार्थसमवेताः क्रियागुणास्तदपेक्षया जातेः प्रकर्षादियोगः, गार्ग्यतरो गार्ग्यकल्प ईषद्गार्ग्यो गार्ग्यपाश इति, यथा गोतरो गोकल्पो गोपाश इति ॥

षष्ठी। २। २। ८॥

भाष्ये

वक्ष्यतीति। (भा)

[1]"न निर्धारणे" इत्यत्रेति शेषः॥ उत्कर्षप्रतिद्वन्द्व्यर्थकापकर्ष-शब्दस्यानन्वयादाह

अपवाद इतीति। (कै)

अपक्रष्यतेऽनेनोत्सर्ग इत्यपकर्षोऽपवाद इत्यर्थः॥

---

१ अ २। पा २। सू १०॥

षष्ठी॥ षष्ठ्यन्तं समर्थेन सुबन्तेन सह प्राग्वत्। राजपुरुषः। कृद्योगा च षष्ठी समस्यत इति वाच्यम्। इध्मप्रव्रश्चनः। प्रतिपदविधाना चेति निषेधस्यायमपवादः। वस्तुतस्तु स निषेधोऽयं तदपवादश्चेत्युभयमपि न वक्तव्यमिति वक्ष्यते॥

"षष्ठी"॥ 'कृद्योगा चेत्यादि'। 'कर्तृकर्मणोः कृती'ति कृच्छब्दोपादानेन वा विहिता सा कृद्योगा। 'इध्मप्रव्रश्चन इति'। ओव्रश्चूच्छेदने, करणे ल्युट्। 'पलाग्रघ्नातन इति'। पलाग्राणि घ्नात्यन्ते पात्यन्ते येन दण्डादिना स पलाग्रघ्नातनः। किमर्थमिदमुच्यत इति'। सूत्रेण सिद्धिं मन्वानस्य प्रश्नः। 'प्रतिपदविधाना चेत्यादि'। यदा तस्य वक्तव्यस्यारम्भ, तदेदमपि वक्तव्यं, तस्य त्वनारभ्यतां तत्रैव वक्ष्यामः। अपकर्ष इति' अपवाद इत्यर्थः॥

प्रतिषेधविषये । (कै)

सर्पिषो ज्ञानमित्यादौ ॥

कारकविशेषेति । (कै)

कर्तृकर्मणोरित्येवमित्यर्थः ॥

इत्यादिप्रकरणमिति । (कै)

तत्र शेष इत्यनुवृत्तेरिति भावः ॥

शेषलक्षणा (भा)

इत्यस्य शेषमात्रलक्षणमित्यर्थ इति तात्पर्यम् ॥

समासनिवृत्त्यर्थमेवेति । (कै)

तत्तद्धातुयोगे उपात्तकारकातिरिक्तकारकाणां शेषत्वविवक्षाभावज्ञापनेऽपि चारितार्थ्यसंभवादिदं चिन्त्यम्। किञ्च लुगभाव एव कल्प्येत। यदि त्वेतद्वार्त्तिकबलात्समासाभावकल्पनं तदा तदावश्यकमेव। सूत्राण्यपि तत्रानुवादायावश्यकानीति न वक्तव्यं [१]"प्रतिपदविधाने"तीति चिन्त्यम्। किञ्च तस्य वचनस्य सत्त्वे [२]"दिवस्तदर्थस्य" [३]"क्त्वोऽर्थप्रयोग" इत्यादिविषये ऽज्ञाणां देवितेत्यादौ क्तनन्ते [४]"नलोकेति" निषेधेन [५]"कर्तृकर्मणोरि"ति षष्ठ्यभावेन षष्ठ्यां समासनिषेधसिद्धिः। त्वद्रीत्या तु शेषग्रहणस्य तत्र निवृत्त्या

---

१ अ २ । पा २ । सू १० (वा) ॥ २ अ २ । पा ३ । सू ५८ ॥
३ अ २ । पा ३ । सू ६४ ॥ ४ अ २ । पा ३ । सू ६५ ॥
५ अ २ । पा ३ । सू ६६ ॥

समासः स्यादित्यपि चिन्त्यम् । तच्छब्देन द्रव्यपरामर्शे काकस्य काष्ण्यमित्यादावतिप्रसङ्गमाशङ्क्याह

तच्छब्देनेति ॥ (कै)

स्वात्मनीति । (कै)

स्वात्मन्येवाभेदे सावस्थिता न तु द्रव्ये इत्यर्थः ॥ नन्वभेदस्याधाराधेयभावनियामकत्वाभावात्तत्स्थैरित्यनुपपन्नमिति शङ्कते

न चेति ॥ (कै)

यद्यपि व्यपदेशिवद्भावेन तत्स्थैरिति वक्तुं शक्यम् । तथापि स न मुख्य इत्याह

मुख्यस्येति ॥ (कै)

उत्तरयति

तस्माद्विधानेति । (कै)

गुणमात्रशक्यशब्दमात्रप्रतिपाद्यगुणवाचकैः शब्दैरित्यर्थः ॥ अत एवार्थस्य तत्स्थत्वमित्यग्रे वक्ष्यति । तदेवोपपादयति

इह केचिदिति ॥ (कै)

द्रव्यान्निष्कृष्टाः । (कै)

भेदेनैव द्रव्यान्वयिनः । तदा हि गुणगतजातिः प्रवृत्तिनिमित्तम् ॥

उपरञ्जकत्वम् । (कै)

स्वाभेदेन द्रव्यप्रत्यायकत्वम् ॥

द्रव्येणैकत्वमिति । (कै)

जातिविशिष्टगुणप्रवृत्तिनिमित्तम् । अत एव ततो भावप्रत्ययेन गुणबोधः ॥

अर्थस्य च तत्स्थत्वमिति । (कै)

एवं च गुणिपरत्ववाचकशब्दाभाववत्त्वं तात्स्थ्यमिति फलितम् ॥

एवं तर्हीति । (कै)

तद्विशेषणैरित्यस्य तद्विशेषप्रतिपादकैरित्यर्थ इति भावः ॥ तीव्रादिशब्दैः ममामप्रमङ्गमुपपादयति

यश्च गन्धेति ॥ (कै)

एवं तर्हीति । (कै)

तद्विशेषणैरित्यस्य तद्विशेषप्रतिपादकैरित्यर्थात्तीव्रादयः शुक्लादयश्च विशेषसूत्रस्य विषया इत्यनेन सूच्यते इति भावः ॥ भाष्ये

किमर्थमिदमिति । (भा)

इदमा व्यवहितमपि तत्स्थैरिति परामृश्यते । तदाह

गुणेनेति ॥ (भा)

केवलगुणेति । (कै)

घृतस्य तीव्र इत्याद्यपि केवलगुणवाच्येवेति भावः ॥ भाष्ये

एतदेवेति । (भा)

काकस्य कार्ष्ण्यमित्याद्येव ॥

यद्यौदमिति । (भा)

यच्चिदमित्यर्थः ॥

सापेक्षमसमर्थमिति। (भा)

इतरसापेक्षत्वेन शुक्ला इत्यनेनानन्वयादसामर्थ्यमित्याशयः। तद् ध्वनयन्नाह

शुक्लार्थेन संबन्धाभावादिति। (कै)

न तु तद्विशेषणैरिति वक्तव्यमितिभाष्ये प्रतिषेधविषयप्रदर्शनार्थमित्यादिः॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २। २। ११॥

---

[1]सत्त्वे निविशते (भा)

इत्यादि। वस्तुत इदं चिन्त्यम्। तस्य [2]"आकडार"सूत्रोक्तगुणवचनपदार्थसमत्वात्। तत्र [1]"वाचकः सर्वलिङ्गानामि"त्युक्तत्वात्काकस्य

---

१ सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते। आधेयस्याक्रियाजस्य सोऽसत्त्वप्रकृतिर्गुणः॥ (४। १। ४४)॥

२ अ १। पा ४। सू १॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन॥ पूरणाद्यैस्त्रिभिः सदादिभिश्च षष्ठी न समस्यते। पूरणे, सतां षष्ठः। अत्र पूरणार्थाः

"पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन"॥ 'प्रत्येकमिति'। पूरणादिभिरित्यर्थः। 'स्वरूपविधिरिति'। पूरणादीनामर्थपर्यन्तानां

काष्ण्यमित्यादेरनुदाहरणत्वप्रसङ्गात् । तस्मादव्याख्यानात् केवल-गुणवाची सन् यो गुणिबोधकः तत्प्रकृतिकभावप्रत्ययान्तप्रतिपाद्यानां गुणपदेन ग्रहणम् अर्थपदान्वयाच्च तद्बोधकशब्दमात्रग्रहणम् । एवं च प्राधान्यगौरवादौ प्रसक्तिरेव न ॥

अवस्थितवृत्तिरिति । (कै)

प्रत्यया एव गृह्यन्ते न तु पूरणोम्नादिशब्दा अपि । तेन कुम्भपूरणभव पटुरुचैरित्यादि सिद्धम् । अत्र च ज्ञापकं लोपेचेत्यादपूरणमिति सूत्र-प्रयोगः । पूरणाधिकारस्तु न गृह्यते । भागेन्प्रत्यये सति तदन्तेनापि निषेधस्य द्वितीयष्टतीयेति सूत्रे भाष्य एव स्पष्टत्वात् । अत एव भिक्षा-द्वितीयमित्यादावन्यतरस्यां ग्रहणसामर्थ्यात्समास इत्युक्तम् । अत एव च "तान्युञ्छषष्ठाङ्कितसैकतानी" ति कालिदासस्य प्रमाद इत्याहुः । षष्ठ इत्याख्यातः षष्ठः । आख्यातण्यन्तादेरजिति वा समाधेयम् । गुणस्येह "सत्त्वे निविशतेपैती" ति लक्षितो गृह्यते । केवलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादकः व्याश्रित्यायात् । काकस्य काष्ण्यम् । ब्राह्मणस्य शुक्लाः । यदा ऽर्थात्प्रकरणाद्वा दन्तादि विशेष्यं निर्ज्ञातं तदेदमुदाहरणम् । कथं

चतुर्णामित्यर्थः, अत एव गुणशब्देन नादेर्ङां ग्रहणं किं तर्हि सत्वे निविशतेऽपैतीत्यादिलक्षणलक्षितस्य गुणस्य ग्रहणं, नापि नञोगुणप्रतिषेधे यस्य गुणस्य हि भावादिवत्प्रवृत्तिनिमित्तमात्रस्य ग्रहणं सामान्यादेरपि प्रसङ्गात्, नापि लोकप्रसिद्धस्य शुक्लादेरेव ग्रहणं कणटकस्य तैक्ष्ण्यमि-त्यादेरपीष्टत्वात्, गुणशब्देन न केवलगुणवाचिनो गुणोपसर्जनद्रव्यवाचिनश्च व्याश्रित्यायाश्रयेण गृह्यन्ते तत्र गुणस्य गुणप्रधानत्वात्केवलगुणवचनैर्गुणेन समासनिषेधः कणटकस्य तैक्ष्ण्यमिति गुणवचनैस्तु तत्सम्बन्धिनो निषेधो

(अ. २। पा. २। आ. १) (पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २। २। ११।)

सामान्यशब्दस्यापि प्रकरणादिशेषसमाचोपस्थापकत्वमित्यर्थः॥ अनेनैतत्सूचयति वाक्यैकदेशन्यायेन शुक्ला दत्ता इत्यस्य दत्ताः शुक्ला इत्यर्थः॥ "षष्ठी"त्यस्य च षष्ठ्यन्तं समर्थप्रकृतिकसुबन्तेन समस्यते इत्यर्थः। तादृशं च न शुक्ला इति। पदमित्यसामर्थ्यन्तदवश्यमेव। एतदभिप्रायेणैव पूर्वसूत्रे एतदेवोदाहरणमित्युक्तम्। अत्रेदं भाष्यं लेकदेशयुक्तिः। अनेन समासशङ्कावारणायाबुधानां यत्नः क्रियत इति

तर्हि गोसहस्रमिति। अत्राऽऽहः। संख्यया नायं निषेधः शतसहस्रान्ताच्च-निष्कात् क्रीणशतजनशतयोरुपसंख्यानम्। खारीशतमपि न ददातीत्यादि-मुनित्रयप्रयोगात्। अनित्यश्चायं गुणेन निषेधः। संज्ञाप्रमाणत्वात्, उत्तरपदार्थप्राधान्यमित्यादिनिर्देशात्। तेन करणपाटवम्। अर्थगौरवम्। बुद्धिमान्द्यमित्यादि सिद्धम्। चन्दनगन्ध इत्यादौ तु नायं निषेधः। तत्स्थैश्च गुणैरिति समासस्य प्रतिप्रसवात्। गन्धत्वेन प्रतीयमानो हि गन्धो न कदापि गुणिसमानाधिकरणः। किन्तु स्वप्रधानः। यस्तु वक्ष्यति जलमयं पिनष्टि गन्धानिति प्रयुज्यते स चन्दनत्वादिजातिनिमित्तको न तु गुणशब्दः। मालतीकुसुमादिष्वदर्शनादिति। एवं घटरूपमित्यादि। सुरभिशुक्लादिशब्दास्तु न तत्स्थगुणप्रतिपादकाः। तेन रूपेण प्रतीयमानस्य गुणिसामानाधिकरण्यदर्शनात्। एवं शौकल्यमित्यादावपि बोध्यम्। शौकल्यसौरभादिशब्दैर्हि शुक्लत्वसुरभित्वादिप्रकारक एव गुणबोधः।

ब्राह्मणस्य शुक्लादन्ता इति, न चात्र दन्तापेक्षया ब्राह्मणस्येति षष्ठी ततश्च शुक्लेनासंबन्धादप्रसङ्ग एव समासस्य, यदा तर्ह्यर्थात्प्रकरणाद्वा दन्ताद्यर्थ एव शुक्लादिशब्दस्य वृत्तिर्विज्ञाता भवति तदा तत्सम्बन्ध एव षष्ठीत्यस्ति समास-प्रसङ्गः, 'शतसहस्रान्ताच्च निष्कात्' 'क्रीणशतयोजनशतयोरुपसंख्यानं' खारीशतमपि न ददातीत्यादि मुनित्रयप्रयोगाद् गोर्विंशतिरित्यादौ संख्यया

(पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । २ । २ । ११ ।) (अ. २। पा. २। आ. १)

[१]"कर्मणि चे"ति सूत्रे वदता कैयटेन ध्वनितमेतत्। अन्यथा ब्राह्मणस्य ग्रामं गत इत्यर्थे ग्राममित्यस्य प्रकरणादिज्ञाने गत इत्यस्यैव वाक्यैकदेशन्यायेन तावदर्थत्वे समर्थात्समासापत्तिरिति स्पष्टं [२]"कर्मणि चे"ति सूत्रे भाष्ये ॥ ननु ब्राह्मणस्य पच्यन्नित्यस्य ब्राह्मणस्यौदनं पच्यन्नित्यर्थावगमाद् ब्राह्मणस्य पाकापेक्षया कर्मत्वकर्तृत्वाभावात् कर्तृत्वस्योक्तत्वाच्च षष्ठ्या अप्राप्तौ प्रतिषेधोक्तिरसङ्गतेत्यत आह

---

१ अ २ पा २। सू १४॥ २ अ २। पा २। सू १४॥

तद्रूपापन्नस्य च द्रव्यसामानाधिकरण्यमस्त्येव शुक्लः सुरभिरित्यादाविति दिक्। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। करणस्यैव प्रेषत्वविवक्षया षष्ठी। न च न लोकेतिनिषेधः शङ्क्यः। तस्य क्तद्योगलक्षणषष्ठीविषयकत्वात्। इह सुहितार्थयोगे करणस्य प्रेषत्वविवक्षैव नियतेत्याऊरिति हरदत्तः। तत्राऊरित्यपरितोषोद्भावनम्। तद्बीजन्तु नियमे प्रमाणाभावः।

"नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न पुंसां वामलोचना" ॥

इत्यादिप्रयोगाणां पाक्षिक्यापि विप्रेषत्वविवक्षया सिद्धत्वात्। अत एव करणत्वविवक्षया तृतीयां भट्टिः प्रायुङ्क्त।

समासो न निषिध्यते, संज्ञाप्रमाणत्वादुत्तरपदार्थप्राधान्यमित्यादिप्रयोगदर्शनादनित्यो गुणेन निषेध इति करणपाटवं बुद्धिमान्द्य यत्नगौरवमित्यादिसिद्धिः। 'फलानां सुहित इति'। करणस्यैव प्रेषत्वविवक्षया षष्ठी, प्रेषत्वविवक्षैव च नियता सुहितार्थयोगे करणस्येत्याऊः, क्तद्योगलक्षणाया एव षष्ठ्या निष्ठायोगे निषेधः। 'ब्राह्मणस्य कुर्वन्निति'। नेयं घटाद्यपे-

(अ. २। पा. २। आ. १) (पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २। २। ११।)

आवर्जनवाचीति। (कै)

आवर्जनमङ्गीकारस्त्यागो वा इत्याहुः॥

कर्मणि न भवतीति। (कै)

शेषषष्ठ्यन्तस्य नामार्थान्वये संभवति क्रियान्वयो नेति भावः। एतेन कर्मणः शेषत्वविवक्षायां षष्ठी सुलभेत्यपास्तम्। न [1]"लोके"-त्येतन्निषेधविषयेनाभिधानाच्छेषत्वविवक्षैव न भाष्यप्रामाण्यादित्यन्ये॥

---

१ अ २। पा ३। सू ६९॥

फलैर्नानाविधैश्चित्रैः स्वादुशीतैश्च वारिभिः।
तृप्तास्तां भ्रातृमतीं पप्रच्छुः कस्य पूरियम्"

इति। नन्वेवं षष्ठीसमासे निषिद्धेऽपि तृतीयातत्पुरुषेण फलतृप्त इति स्यादेवेति चेत्। इष्टापत्तेः। न चैवं निषेधवैयर्थ्यम्। स्वरे विशेषात्। तथाहि। षष्ठीसमासेऽन्तोदात्तत्वं स्यात् तृतीयासमासे तु थाथादिस्वरापवादस्तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरः। तृपिश्च सकर्मकोऽप्यस्ति। पितृतनाथौत्सममंस्त बन्धुनीति भट्टिप्रयोगात्, तेनास्मात्कर्मणि क्तो नास्तीति न शङ्कनीयम्। फलतर्पणमित्यादौ तु स्यष्ट एव स्वरे भेदः। कारकात्परत्वेन कृदुत्तरपदप्रकृतिस्वरात्। सत्। द्विजस्य कुर्वन् कुर्वाणो

च्चया षष्ठी ब्राह्मणस्य घटं कुर्वन्निति एवं ह्यसामर्थ्यादेव समासस्याप्रसङ्गः, किं तर्हि कुर्वन्निति किङ्कर उच्यते स हि कुर्वन् भवति ततो यथा ब्राह्मणस्य पाचक इति साक्षादेव पाचकेन सम्बन्धो न पुनरोदनद्वारेण तद्वदिहापीति द्रष्टव्यं, चोरस्य द्विषन्निति च सत उदाहरणम्, अत्र द्विषः शृनुर्वावचनमिति पक्षे षष्ठी भवति। 'ब्राह्मणस्य कृत्वेति'। ब्राह्मणार्थं कृत्वेत्यर्थः,

(पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २। २। ११।) (अ. २। पा. २। आ. १)

ननु [१]"द्विषोऽमित्रे" इति विहितस्य न सत्संज्ञकत्वं [२]"लट" इति सूत्रविहितयोरेव तत्संज्ञाविधानादित्याशङ्क्याह

[३]तौसदिति ॥ (कै)

अस्य शतुर्लादेशत्वाभावादाह

तृनिति ॥ (कै)

अस्योदाहरणत्वं स्थापयति भाष्ये

---

१ अ ३। पा २। सू १२१॥ २ अ ३। पा २। सू १२४॥
३ अ ३। पा २। सू १२७॥

वा। किंकर इत्यर्थः। शेषे षष्ठी। चोरस्यद्विषन्। इह द्विषः शतुर्वावचनमिति याच्ञिकी कर्मणि षष्ठी। अव्ययम्। ब्राह्मणस्य कृत्वा। तादर्थ्यरूपसम्बन्धस्य सामान्यरूपेण विवक्षायां षष्ठी। ब्राह्मणसम्बन्धिनी क्रियेत्यर्थः। पुरा सूर्यस्योदेतोरित्यप्यव्ययोदाहरणम्। इह कर्त्तरि षष्ठी। अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति वचनात्। अत्र सत्तथाभ्यां साहचर्यात्कृदव्ययेनैव समासो निषिध्यते। येन तदुपरीत्यादि सिद्धमिति रक्षितः। तथा च भट्टिप्रभृतयः प्रयुञ्जते। यत्कृतेरीन्निगृह्णीमः। आदेयाः किंकृते भोगाः कुम्भकर्ण त्वया विना, भवत्कृतेखञ्जनमंजुलाक्षीति, तत्याणिमात्मोपरि पातुकन्तु, किमुतदन्तरुभौ भिषजौ दिव इत्यादि च।

सम्बन्धसामान्यरूपेण विवक्षितत्वात् षष्ठी पुरा सूर्यस्योदेतोरिति चोदाहरणम्, अत्र ह्यव्ययप्रतिषेधे तोसुनोरप्रतिषेध इति कर्त्तर्येव षष्ठ्यस्ति एवं कृत्तस्योपरीत्यादिकमप्युदाहरणम्। 'तव्यता सानुबन्धकेनेति'। निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणमिति भावः। 'ब्राह्मणकर्त्तव्यमिति'। कर्त्तरि षष्ठ्याः समासः कृदुत्तरपदप्रकृतिस्वरेणान्तस्वरितमेतत्। निरनुबन्ध-

वक्षत्येतदिति ॥ (भा)

इत्यादिन्यपीति । (कै)

साहचर्यात् कृदव्ययमेव गृह्यते। अन्याव्ययैः सति सामर्थ्ये समास दृष्ट एवेति भाष्याशयमाहुः॥

पूर्वनिपातानियमः स्यादिति । (कै)

तथा "अनेकमन्यपदार्थे" इति सूत्रे सर्वपश्चादिति भाष्यप्रयोगोऽपीहानुकूलः । कैयटहरदत्तौ तु अव्ययप्रतिषेधे वृत्तस्योपरीत्युदाहरन्तौ कृदव्ययेनापि निषेधं मन्येते तत्तु भट्टिश्रीहर्षादिप्रयोगाणां प्रतिकूलम् । यदा । अस्मिन्पक्षे कृच्छब्दः सम्पदादिक्विबन्तः कार्यपरः । ततश्चतुर्थी । आत्मन उपरि पातुक इति विग्रहः। तस्यां यन्मध्यन्तत्वेत्यर्थे "सप्तमी शौण्डैरि" ति सूत्रोक्तरीत्या सप्तमीतत्पुरुषोऽव्ययीभावो वेति दिक् । तव्य । ब्राह्मणस्यकर्तव्यम् । निरनुबन्धकस्य सूत्रे ग्रहणात्तव्यता समासो भवत्येव । खकर्तव्यम् । खरे भेदः । गतिकारकोपपदादिति कृदुत्तरपदप्रकृतिस्वरः । तत्र तव्यतस्त्वित्त्वेनान्तस्वरितता । तव्यस्य त्वादुदात्तत्वान्मध्योदात्तं पदमिति । समानाधिकरणेन । तच्चकस्य सर्पस्य । विशेषणसमासस्त्विह बहुलग्रहणान्नेत्युक्तम् । स्यादेतत् । इह षष्ठीसमासः प्राप्नोत्येव न । बाह्यसम्बन्धपेक्षा ह्येयं षष्ठी । तथा च कटोऽपि कर्म भीष्मादयोऽपीति न्यायेन द्वयोरपि षष्ठ्यन्तयोर्विषप्रभृतिनान्वये सति पश्चात्पातिपदिकार्थमात्रयोः पार्ष्णिकः सम्बन्धो वाच्यः । तथा च तच्चकस्येति सर्पस्येति च परस्परमसमर्थं कथं

केन तु समास उत्तरपदं मध्योदात्तं स्यात् सोयं स्वरार्थस्त्वयेन निषेधः । 'शुकस्य मारुविकस्येति' । मा रावीत्याहेति मारुविकः, 'तदाहेति मा शब्दादिभ्य उपसंख्यानमिति' ठक् शब्देन क्रियायाः प्रतिषेधको मारुविकः, संज्ञैषा शुकविशेषस्य, क्वचित्तु मारुविदस्येति पाठः, तत्र मारुविशब्दं

उपसर्जनत्वस्यान्वर्थतामाश्रित्य षष्ठीसमासेऽपि तन्नियमसंभवादुपसर्जनसंज्ञासूत्रे स्वयमपि तथैवोक्त्वा चिन्त्यमेतत्। तस्माद्विशेषणसमासोऽयत्र बाऽऽलकानेत्येव तत्त्वमिति कश्चित् तन्न। अर्धपिप्पली-त्याद्यनुरोधेन तस्या अन्वर्थत्वाश्रयणमप्रयोजकमित्याशयात्॥

विशेषणसमासे च वचनसामर्थ्यादिति। (कै)

समस्यताम्। अत एव नीलोत्पलस्य मेरुमहीभृत इत्यादावपि प्रथमान्तयोर्विशेषणसमासे ततः षष्ठीतिन्याय्यं न तु षष्ठ्यन्तयोर्विशेषणसमासः। उक्तरीत्या ऽसामर्थ्यात्। किं च यथा चित्रगुरित्यादौ सम्बन्धस्याभिहितत्वात्तथा तत्रेहापि षष्ठ्यन्तयोः समासे ततः प्रथमैव स्यान्न तु षष्ठी। उच्यते। कट एव कर्म भीष्मादयस्तु तत्सामानाधिकरण्यमात्रात्तद्विभक्तिं लभन्त इति पक्षे इदं बोध्यम्। समानाधिकरणेन निषेध एव चैतत्पक्षज्ञापकः। अत एव विशेषणविभक्तिः साधुत्वार्थत्वादघोषोऽपि सङ्गच्छते। न चैवमपि समासात्षष्ठी न स्यादिति वाच्यम्। पञ्चकपक्षे द्वितीयादेरिवोपपत्तेः। सकलविभक्तिसाधारणेन कर्मधारयेणान्यतरस्य स्फुटमनभिधानात् एवैव च वैयधिकरण्यस्थले सर्वेषां गतिः। तथाहि। राज्ञः कुमार्या राजकुमार्या इति षष्ठ्यन्तस्य समासे पूर्वनिपातानियममाशङ्क्योपसर्जनसंज्ञाया अन्वर्थतामाश्रित्य समाहितमाकरे। न च तत्र त्वदुक्तस्यासामर्थ्यस्योक्तिसम्भवोऽपि, येन प्रथमान्तमेव समस्येत। तथा च

ददातीति साशाविदः, स एवार्थः। 'किं च स्यादिति'। भवितव्यमेवात्र विशेषणसमासेन तत् षष्ठी समास एवास्तु को दोष इतिप्रश्नः, 'पूर्वनिपातानियमः स्यादिति'। द्वयोरपि प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादिति भावः। ननु विशेषणसमासेऽपि द्वयोरपि यत्र विशेषणविशेष्यभावस्तत्रेत्य-

[1]"पूर्वापरप्रथमचरमेति" सूत्रे समानेत्यादिवचनसामर्थ्यादित्यर्थः। एवं च षष्ठीसमासे तदप्रवृत्तौ मानाभावः। न चैवं बहुव्रीहिरुच्छिद्येत। शेषग्रहणसामर्थ्येन तत्राप्यस्याप्रवृत्तेः। न च सुन्दरपाचक इत्यादौ तस्य सावकाशता। एवं तर्हि समानेत्यादिसामान्यापेक्षं यत्र समानाधिकरणानां विशेषविहितः समासः तत्रैतदप्रवृत्तिः समानादेश्च क्वदन्तेन न समासोऽनभिधानादित्याशयः। केचित्तु [2]"प्रथमानिर्दिष्टमिति" सूत्रभाष्योक्तरीत्या [3]"षष्ठी"तिसूत्रे-

---

१ अ २ । पा १ । सू ५८ ॥ २ अ १ । पा २ । सू ४३ ॥
३ अ २ । पा २ । सू ८ ॥

राज्ञः कुमारी कुमार्यै इत्यादय एव विग्रहा इति उपसर्जनसंज्ञाविधायकयोः सूत्रयोः काशिकादौ स्पष्टम्। "अनेकमन्यपदार्थे" इति सूत्रे "तत्पुरुषे तुल्यार्थे" इति सूत्रे च भाष्यकैयटयोरपि स्पष्टमेवेदम्। तथा च प्रथमान्तेन विग्रह इति नियमाभावात्सर्वत्र तत्पुरुषोपरि द्वितीयादिविभक्तयः पञ्चकपञ्चवदेवोपपादनीया इति तत्त्वम्। राजपुरुषादौ सङ्ख्याया इवोत्तरपदार्थप्रविष्टसम्बन्धस्यापि वृत्तावप्रवेशाच्च। प्रयोगार्हे विग्रहे परं समासोत्तरविभक्तिसजातीयायाः प्रयोगात्। पचन्तीति पाचका इतिवत्। वाक्यसंस्कारपक्षे ऽलौकिकेऽपि बहुवचनात्षष्ठ्यादिकल्पनाया एव न्याय्यत्वादिति दिक्। यत्तु वृत्तावुदाहृतं **शुकस्य मारावित्कस्य राज्ञः पाटलिपुत्रकस्येति**। तत्र मारावीत्याहेति मारावित्कः। "तदाहेतिमा-

---

क्षमतस्तेनापि समासे विशेषणमिति प्रथमानिर्देशो द्वयोरपि तुल्यः, अथ तत्राप्रधानमुपसर्जनमार्थं चाप्राधान्यमिति द्रव्यगुणादिषु तेन प्रकारेण व्यवस्था षष्ठी समासेऽपि तथैव व्यवस्था भविष्यति तस्माद्यत्तत्र प्रत्युदाहरणं

येन सुबन्तेन समासस्तदर्थनिरूपितसंबन्धार्थकषष्ठ्येव गम्यते तादृशमेव च सामर्थ्यं षष्ठीसमासप्रवृत्तौ निमित्तम्। न चेदं सामर्थ्यं प्रकृतेऽस्ति तच्च इत्याशयेनाह

असामर्थ्याद् न भविष्यतीति। (भा)

एवं च प्रत्याख्यातं समानाधिकरणग्रहणम्। अयमभाष्यं चैतदाशयानभिज्ञपूर्वपक्षिसिद्धान्तिनोरेकदेशिनोरुक्तिपरमित्याहुः॥

ग्रब्दादिभ्य उपसंख्यानम्" इति ठक्। ग्रब्दनक्रियायाः प्रतिषेधको मारावकः। मारावदस्येति पाठे मारादिग्रब्दं ददातीति स एवार्थः। एवं पाटलिपुत्रे भवः पाटलिपुत्रकः। इत्थंस्थिते यदीह समासोनिष्टः स्यात्तदेदं समानाधिकरण इत्यस्योदाहरणं सङ्गच्छेत। समास इष्ट इति तु वदता तेनैव नेदमुदाहर्तुं युक्तम्। यत्तु तत्रैव समर्थितम्। षष्ठीसमासे सति पूर्वनिपातानियमः स्यात्। विशेषणसमासे तु विशेषणस्यैव पूर्वनिपातः सिध्यतीति। तच्चेदं वक्तव्यम्। विशेषणविशेष्यभावस्याव्यवस्थितत्वेनातिप्रसङ्गे प्राप्ते ऽप्रधानमुपसर्जनम् आर्धं चाप्राधान्यमित्यादिक्रमेण द्रव्यगुणादिग्रब्देषु व्यवस्थेष्यते। तच्च षष्ठीसमासेऽपि सुवचमिति किमन्तरङ्गत्वेनेति। वस्तुतस्तु गोधेनोः भोज्योष्णस्य कुमारश्रमणाया गोगर्भिण्या इत्यादीनीहोदाहार्याणि। पोटायुवतीत्यादीनां विभक्त्यन्तरे विशेषणसमासं बाधित्वा चरितार्थानां परेण षष्ठीसमासेन बाधापत्तेः। तथा च विशेषणस्यैवोपसर्जनतया पूर्वनिपातेऽप्यनिष्टं स्यादेवेत्यवधेयम्॥

तत्तक्षः सर्प इति तयोः षष्ठ्यन्तयोः समासप्रसङ्ग एव दोषः, तन्निवृत्तये च प्रतिषेध इति वाच्यं, तदिह किं च स्यादित्यादिकमेवानुपपन्नम् उदाहरणं तूपपन्नं यदि मारावकग्रब्दः संज्ञा, अथ सोऽपि योगवृत्तिः, तर्हि तदप्यनुपपन्नम्, एवं पाटलिपुत्रकेऽपि द्रष्टव्यम्॥

कर्मणि च । २ । २ । १४ ॥

दोषदर्शनादिति । (कै)

पक्षद्वयेऽपि दोषदर्शनादित्यर्थः ॥

क्वचित्तु तृजकाभ्यामिति । (कै)

[१] 'तृजकाभ्यामि''त्यस्य कर्त्र्यर्थतृजकाभ्यामित्यर्थे इदम् ॥

[२]"कर्त्तरिचे''त्यस्यैवायमर्थ इति वृत्तिमते आह

कर्त्तरि चेति । (कै)

अन्यैस्त्वनुपपदकृदन्तैः शेषषष्ठ्या समासो भवत्येव । गङ्गाधर-भूधरादौ खरेऽपि न विशेषः । उभयथाप्यन्नोदात्तत्वात् । न च [३]"गस्थकनि" गाथकशब्देन सान्नां गायक इत्यर्थे समासानापत्तिः । शेषषष्ठ्या समासेऽपि खरे विशेषादिति वाच्यम् । अकर्त्तरीत्यस्य "तृजकाभ्यां कर्त्तरीति" सूत्रनिर्दिष्टभिन्ने नेत्यर्थात् कर्मणीत्यस्य षष्ठीविशेषणत्वे क्तेनेत्यस्याचाननुवृत्तिरेवेति बोध्यम् ॥ भाष्ये

---

१ अ २ । पा २ । सू १५ ॥ २ अ २ । पा २ । सू १६ ॥
३ अ ३ । पा १ । सू १४६ ॥

कर्मणि च ॥ चकार इतिशब्दार्थः ॥ कर्मणीतिशब्दमुच्चार्य विहिता पञ्चम्येषिता वा या षष्ठी सा न समस्यते । चित्रङ्गवान्दोहो ऽगोपेन । यद्यनेन कर्मषष्ठीमात्रं न समस्यते इत्यभिप्रेतं स्यात्तर्हि तृजकाभ्यां निषेधं

"कर्मणि च" ॥ 'उभयप्राप्तौ कर्मणीति'। अनेकार्थत्वान्निपातानामितीत्यर्थे चशब्दोयं तेन कर्मणीत्युच्चार्य या षष्ठी विधीयते सा न समस्यतइत्यर्थः । यदि च या काचन कर्मणि षष्ठी गृह्येत 'कर्तरि चेति' निषेधं न कुर्याद् अनेनैव सिद्धत्वात् साधु पयसः पानमिति, कर्मणि च

तृजकाभ्यां चेति। (भा)

अस्यैव कर्तर्यर्थे तृजकाभ्यामित्यर्थ इति भावः॥

पारंपर्येणेति। (कै)

भुजेरोदनेनौदनस्य ब्राह्मणेनेतीत्यर्थः॥

भवति वै इति। (कै)

ब्राह्मणस्य भुक्ता इत्यत्रोक्तो न्यायः॥

समासशङ्कानिवारणायेति। (कै)

अनेन तन्त्रायाश्रयणेऽपि पूरणेतिसूत्रोक्तमर्द्रीत्या वस्तुतः सामर्थ्यं नास्त्येवेति सूचयति। तदाह

अबुधानामिति॥ (कै)

अतिप्रसङ्ग इति। (कै)

अन्यत्रायेवं न्यायैः समासापादनसंभवात् तत्रापि प्रतिषेधो वक्तव्य इत्यर्थः॥ भाष्ये

ब्राह्मणस्य गत (भा)

इत्यादेर्ब्राह्मणस्य ग्रामं गत इत्यादिक्रमेणार्थः॥

इत्याद्युदाहरणमिति। (कै)

"ब्राह्मणस्य भुक्तो ब्राह्मणस्य गत" इति पूर्वोक्ते तु असामर्थ्यादेव समासो न भवतीति हृदयम्॥

नारभेत। यत्र हि कर्तरि तृजकौ तत्र कर्मणिषष्ठ्याभावयम्। शब्दानुशास नमित्यादौ यथा न समासनिषेधस्तत्रोक्तं पस्पशायाम्॥

येन संस्पर्शादिति नित्यसमासार्थवचनमिति वक्ष्यति, तत्र पयः पानं सुख-मित्युदाहरिष्यते, इदं तु शरीरसुखस्याविवक्षायां रोगाद्यभिभूतो ऽग्नक्षु-वन्नेव यदा साधु पिबति तदा द्रष्टव्यम्॥

नित्यं क्रीड़ाजीविकयोः। २। २। १७॥

प्रतिषेधे सिद्ध इति। (कै)

जीविकाविषये टजकाभ्यामित्यनेन [1]कर्त्तरि चेत्यनेन वेति भावः॥

नित्यप्रतिषेध इति।

१ अ २। पा २। सू १६॥

नित्यं क्रीडाजीविकयोः॥ एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्येयं संज्ञा। संज्ञायामिति भावे ण्वुल् पुष्पाणामिति कर्मणि षष्ठी। जीविकायाम्। दन्तलेखकः। तच्च क्रीडायां विकल्पे प्राप्ते जीविकायां कर्तरिचेति निषेधे प्राप्ते वचनम्। जयादित्यस्तु टजकाभ्यामिति सूत्रे कर्तरीत्येतदनुवृत्तायाः षष्ठ्या विशेषणं। टजुत्तरार्थं इत्युक्त्वा कर्तरिचेति सूत्रे कर्टग्रहणं टजकयोर्विशेषणतया व्याख्याय नित्यंक्रीडेति सूत्रे अकप्रत्ययमेवोदाजहार। तत्रेदं वक्तव्यम्। प्रथमसूत्रेकर्टग्रहणं टजकयोरेव विशेषणं युक्तम्। तयोः श्रुतत्वात्। न तु षष्ठ्याः। एवं च टजुत्तरार्थं इत्यपि न कल्प्यम्। अकस्यैव चोत्तरत्रानु-

---

"नित्यं क्रीडाजीविकयोः"॥ 'नेति निवृत्तमिति'। नित्यग्रहणाद्-महाविभाषाधिकाराद्विकल्पेनैव पाक्षिकस्य प्रतिषेधस्य सिद्धत्वान्नित्यः प्रतिषेधो भविष्यति किं नित्यग्रहणेन। टच् क्रीडाजीविकयोर्नास्तीति'। वामनस्त्वके जीविकार्थइत्यचाकइति किं रमणीयकर्तेति जीविकायां टचं प्रत्युदाहरिष्यति स मन्यते मा भूत्क्रीडायां टच् लक्षणाभावात्, जीवि-

प्रतिषेधवाक्यैस्तद्विषये व्यपेक्षाया एव बोधनादिति भावः ॥ विधित्वे तु जीविकायां "कर्त्तरि चे"ति निषेधे प्राप्ते ऽस्यारम्भात्तद्विषये नित्यमित्येतत्सार्थकं क्रीड़ायां तु विकल्पे प्राप्ते ऽस्यारम्भात्सामर्थ्यादेव नित्यत्वं सिद्धमिति बोध्यम् ॥

वृत्तिर्न तृटचः, असम्भवात् । तथा च सूत्रद्वयस्य व्यर्थासेनार्थ उचित इति । वामनस्तु अके जीविकार्थइति सूत्रे अकइति किम् । रमणीयकर्तेति । जीविकायां टचं प्रत्युदाजहार । तस्यायमाशयः । मा भूत्क्रीडायां टच । लक्षणाभावात् । जीविकायान्तु ण्वुल्टचाविति ण्वुलि टजपि सुलभ एवेति । एतन्मते नित्यंक्रीडेत्यत्र टज्ग्रहणासम्बन्धेऽप्यङ्गावारणार्थं टजुत्तरार्थं इत्यादि कुरुच्छादरणमित्याशयः ॥

कायां तु ण्वुल्टचाविति ण्वुलिव टच् कस्मान्न स्यादिति, अन्ये तु तदनुसारेणेदमप्येवं व्याचक्षते क्रीडाजीविकयोर्नास्तीति द्वयोर्नास्ति किन्त्वन्यतरत्रैवेत्यर्थः । 'अक एवोदाक्रियते इति' । उभयत्रेत्यर्थः । उद्दालकपुष्पभञ्जिकेत्यादौ संज्ञायामिति ण्वुल्, नित्यग्रहणमुत्तरार्थं नहि वाक्येन क्रीडाजीविकयोरवगतिरस्ति, क्रियाकारकसम्बन्धमात्रावगमात् ॥

कुगतिप्रादयः। २। २। १८॥

ननु गतिग्रहणेन प्रादीनां विशेषणात्कर्मप्रवचनीयेषु प्राप्त्यभावादनर्थकः प्रतिषेधोऽत आह

प्रादिग्रहणस्येति॥ (कै)

प्रत्यादिविषय एवेति। (कै)

व्याख्यानादिति भावः॥

सामर्थ्यसद्भावादिति। (कै)

वृत्तगतलक्षणत्वद्योतकत्वादिति भावः॥

द्वितीयापि न स्यादिति। (कै)

कुगतिप्रादयः॥ कुशब्दो गतिसंज्ञाः प्रादयश्च समर्थेन नित्यं समस्यन्ते। कुः पापार्थे। कुपुरुषः नित्यसमासविषयस्याप्यस्य पूर्वपदप्रकृतिस्वरार्थमव्ययत्वमिष्यते। तथा च वार्त्तिकम्। अव्यये नञ्कुनिपातानामिति। तस्मादयं स्वरादिषु बोद्धव्यः। स एव चेह ग्रह्यते न तु धिवीवृत्तिः। गत्यादिसाहचर्य्यात्। गतिः। उरीकृत्य। प्रादिग्रहणमगत्यर्थम्। तद्विषयविभागार्थानि तु वक्ष्यन्ति वार्त्तिकानि। तथाहि। दुर्निन्दायाम्। दुःपुरुषः। स्तुतौ पूजायाम्। सुपुरुषः। अति पुरुषः। आडीषदर्थे। आ-

---

"कुगतिप्रादयः"॥ 'कुशब्दोऽव्ययं ग्रह्यत इति'। स्वरादिष्वपठितोऽप्ययं पठितव्य इति भावः। नित्यसमासविषयस्यास्य पूर्वपदप्रकृतिस्वरार्थमव्ययत्वं, यथा वक्ष्यति अव्यये नञ्कुनिपातानामिति वक्तव्यमिति। 'न

[1]"कर्मप्रवचनीययुक्त" इति युक्तग्रहणादिति भावः ॥

व्यवहितानामिति । (कै)

स्वान्वययोग्यार्थवाचकपदापेक्षया पदान्तरेण व्यवहितानामित्यर्थः ॥

समास इति । (कै)

अव्यवहितपदैरित्यर्थः ॥ सामर्थ्याभावमाशङ्क्याह

याहीति ॥ (कै)

ऐकस्वर्यमिति । (कै)

अव्ययपूर्वपदप्रकृतिस्वरे सति मन्द्रस्य पृथुमृदात्तत्वं न स्यादित्यर्थः । यद्यपि वेदे आपाद्यं रूपं नास्ति तथापि एवं जातीयके लौकिकप्रयोगे दोष इत्यर्थः । वेदेऽपि तस्यासाधुत्वशङ्कानिवृत्तिः फलमित्यन्ये ॥

---

१ अ २ । पा ३ । सू ८ ॥

पिङ्गलः । प्रायिकं चैतदुपाधिवचनम् । अन्यथा ईषदर्थे चेति कोः कादेशविधानमनुपपन्नं स्यात् । कोषां दुष्कृतं । दुरश्च क्षुच्छार्थे । अनभिधानात्तु भूते खल् न भवति । सुष्ठुतम् । सुशब्दोऽतिशये न तु पूजायाम् । अत एवोपसर्गाजिवन्यनं षत्वम् । अतिस्तुतम् । अतिरतिक्रमणेचेति कर्मप्रवचनीयत्वा-

---

द्रव्यवचन इति' । एधित्यादिद्रव्ये यो वर्त्तते स न गृह्यत इत्यर्थः । 'दुर्निन्दायामिति' प्रशस्ते द्वेषान्निन्दा भवति पापं तु वस्तुस्थित्या गर्हितमिति । द्वयोरप्युपादानम् । 'प्रायिकमिति' । अन्यथेषदर्थे चेति कोः कादेश-

सामर्थ्यमेव नास्तीति । (कै)

एककियान्वयित्वरूपसामर्थ्यग्रहणे हृतः सर्वो मृत्तिकयेत्यादौ समासापत्तिरिति भावः ॥ दध्योदनादौ तु क्रियान्तर्भावेण सामर्थ्यमेवं च वचनद्वयमपि प्रत्याख्यातमिति बोध्यम् ॥ वृत्तौ गतशब्दाप्रयोगे हेतुमाह

वृत्तिविषय इति । (कै)

पदैकदेशन्यायेनेति भावः । प्रगतः शिष्ये प्राप्तः गुरुं प्राप्तः पितामहस्य पितृत्वं प्राप्त इति चार्थः ॥ पूजायामित्युपलक्षणमित्याह

उपाधीनामिति ॥ (कै)

अतिसिक्तमेवेति । (कै)

तथा प्रयोगदर्शनादिति भावः । कर्मप्रवचनीयत्वाच्च षत्वाभावः ॥

भावः । प्रादयो गताद्यर्थे प्रथमया ॥ वृत्तिविषये गताद्यर्थवृत्तयः प्रादयो गतित्वाभावेऽपि प्रादिग्रहणेन समस्यन्त इत्यर्थः प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी । अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ अतिक्रान्तो मालामतिमालः । अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ अवक्रुष्टः कोकिलया अवकोकिलः ।

विधानमनुपपन्नं स्यात् । 'दुष्कृतमिति' । दुर्निन्दायामिति विषयनिर्देशो गतित्वेन प्राप्तस्यापि समासस्य नियामकः स्यादिति मन्यते, यदा तु प्रादिग्रहणप्राप्तस्यैव नियामकत्वं तदा गतित्वादेवाच्च सिद्धः समासः, दुश्च कृच्छ्राद्यैऽनभिधानात्कृतेः खल् न भवति, दुष्कर इत्यादावुपपदसमासः, आमन्त्रेरिन्द्रहरिभिरित्याङो मन्त्रं प्रत्यगतित्वादनौषदर्थत्वाच्च समासाभाव इत्येक-

अर्थान्तरेऽपि (कै)

दृत्यस्य समासो भवतीत्यनेनान्वयः॥ तत्र हेतुः

गतित्वादिति॥ (कै)

दुष्कृतमिति। (कै)

दुःशब्दस्यार्थे। अनभिधानात्तु भूते खल् न भवति॥

सत्यपीति। (कै)

अपिना वस्तुतः सामर्थ्यमेव नास्तीति ध्वनितम्॥

अगतित्वादिति। (कै)

मन्द्रस्य क्रियात्वाभावादिति भावः।

ईषदर्थेऽपीति। (कै)

अत एवोत्तरपदाधिकारे॥

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या॥ परिग्लानोऽध्ययनाय पर्यध्ययनः। अलं कुमार्यै अलंकुमारि॥ नित्यसमासत्वेऽपि चतुर्थीविधानसामर्थ्यात्यच्चे वाक्यमिति रक्षितः। एतेनैकविभक्तिचापूर्वनिपात इति सूत्रे अलंकुमारिरिति भाष्यं पर्यादयोग्लानाद्यर्थ इति समास इति कैयटवचनं च व्याख्यातम्। तदेव भाष्यमनित्यतायां ज्ञापकमिति वास्तु। वस्तुतस्तु नेहानेन समासः। अलमो ऽप्रादित्वात्। प्रादिसमासस्य त्वयं प्रपञ्च इत्याकरः। किन्तु द्विगु-

---

स्वर्यं न भवति। 'सुष्ठुतमिति'। सुशब्दोऽतिप्रशये न पूजायाम्, अत एवोपसर्गनिबन्धनं षत्वम्। 'अतिस्तुतमिति'। 'अतिरतिक्रमणे चे'ति कर्मप्रवचनीयत्वात्षत्वाभावः॥ 'प्रादयो गताद्यर्थ इति'। वृत्तिविषये गताद्यर्थवृत्तयः प्रादयो गतित्वाभावेऽपि प्रादिग्रहणेन समस्यन्त इति। 'पर्यध्ययन इति'। परिश्रान्तोऽध्ययनार्थमित्यर्थः। 'वाससी इवेति'। वसोर्णिच्चेत्यसुन्प्रत्ययान्तो

ईषदर्थ इति। (कै)

कोः कादेशविधानं चरितार्थं पृथ्वीवाचकस्य व्यावृत्तये चेतदुच्यते। साहचर्यं तु न सर्वत्र व्यवस्थापकमिति भावः॥ सहसुपेति योगविभागेन सिद्धे इदं व्यर्थमित्यत आह

सहसुपेत्यादीति। (कै)

एतेन नित्यार्थमिदमित्यपास्तम्। तद्भाष्यप्रामाण्येनेह वार्त्तिकेषु नित्यपदासंबन्धादिति भावः॥ वस्तुतस्तत्पुरुषसंज्ञार्थमत्र वचनानां पाठः। अत एव पुनर्गव इत्यत्र टच्। तत्र करणादतत्त्वमपि लक्ष्यानुरोधेन व्यवस्थेत्याहुः॥

अत्र पूर्वमिति। (कै)

अनुना समासात्पूर्वमित्यर्थः॥

चयाणां पदानामिति। (कै)

गतिविशिष्टतिङन्तेनान्वयस्य समासविधानादित्यर्थः॥

प्राप्तापन्नालम्पूर्वैत्यनेन ज्ञाप्यमानो ऽलंपूर्वस्तत्पुरुषः पृथग्गतिग्रहणात्पर्याप्त्यर्थेनापि भवन्नभिधानानुरोधाच्चतुर्थ्यन्तेनैव भवति। तस्य चानित्यसमासत्वं निर्बाधमेवेत्यवधेयम्। निरादयः क्रान्ताद्यर्थे पञ्चम्या॥ निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः। प्रादिग्रहणस्य अगत्यर्थत्वादतिप्रसङ्गे प्राप्ते कर्मप्रवच-

---

वासःशब्दः, वस्त्रशब्दः ष्ट्रन्प्रत्ययान्तः, द्वावपि नित्यादुदात्तौ। 'प्रादिप्रसङ्ग इति'। सूत्रे प्रादिग्रहणमगत्यर्थमिति कर्मप्रवचनीयानां प्रतिषेध उच्यते प्रत्यादिविषयश्चायं निषेधः स्वल्पोस्तु समासो भवत्येव। 'वृत्तं प्रतीति'। कर्मप्रवचनीयेन योगाद् द्वितीयावत्समासस्यापि प्रसङ्गः, उदा-

[1]उदात्तवता (भा)

दृत्यनेन तु न [2]विना समासः। निघाते तु तस्योदात्तवत्ता-भावादिति भावः॥

[3]तत्पुरुषे तुल्यार्थेति। (कै)

समपाद दृत्यादौ पूर्वपदप्रकृतिस्वरेण पूर्वपदानुदात्तत्ववारणाय उदात्तस्वरितग्रहणानुवृत्त्या तद्योगिपूर्वपदस्यैव [4]"बहुव्रीहौ प्रकृत्ये"-त्यत्र ग्रहणादिति भावः॥

पूर्वपदत्वाभावादिति। (कै)

[5]विनाऽचलदित्यस्य न समासः। किं तु विशिष्टेनाचलदित्यने-नानोरित्याशयः। अन्यथा वेरुदात्तत्वे [6]उदात्तयणः परत्वादकारस्य स्वरितत्वं स्यादिति भावः॥

---

१ उदात्तवता तिङा गतिमता च तिङाव्ययम् (अत्रैव वार्त्तिकम्)॥
२ "विना" इति तृतीयान्तं पदम्॥
३ अ ६। पा २। सू २॥ ४ अ ६। पा २। सू १॥
५ अत्रापि "विना" इति तृतीयान्तं पदम्॥
६ अ ६। पा १। सू १७४॥

नीयानां प्रतिषेधो वक्तव्यः। वृक्षम्यति विद्योतते विद्युत्। कथन्तर्हि अधीत्येति। इह हि अधिपरी अनर्थकाविति कर्मप्रवचनीयत्वम्। उच्यते। अध्यापकधूर्तैरितिनिर्देशादनित्यः प्रतिषेधः। अत एव सुस्तुतमतिस्तुतमिति षत्वाभावेऽपि समास उदाहृतः। स्तुतौ पूजायामिति वचनाद्वा तत्सिद्धिः॥

त्तवता तिङा गतेः समासवचनं, यो जात एव पर्यभूषत्. यः गम्बरमन्व-विन्दत्, योऽन्तरिक्षं विममे यौ वै प्रजवं यातामपथेन प्रतिपद्यते॥

उपपदमतिङ् । २ । २ । १९ ॥

यदि तिङन्तस्येति । (कै)

उपपदस्येत्यर्थः ॥

तिङन्त एवेति । (कै)

[1]तदभिहितस्य द्रव्यवद्भावादिति भावः । न च मा भवान्भूदित्येतद्भावृत्तये ऽतिङन्तः समास इत्यर्थकं तत् । [2]"माङी"त्यस्य सतीत्यर्थात् । तत्रोपपदत्वमेव नेत्यदोषात् । प्रथमार्थे सौत्री सप्तमी हि उपपदसंज्ञालिङ्गमत एव पशावित्यादौ नोपपदत्वम् । तुमुन्ण्वुलाविति त्व तु [3]क्रियार्थोपपदस्येति कार्यार्थमुपपदत्वमावश्यकमिति भाष्याशयः ॥

---

१ अ २ । पा २ । सू १९ ॥

२ अ ३ । पा ३ । सू १७५ ॥ ३ अ २ । पा ३ । सू १४ ॥

उपपदमतिङ् ॥ उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्च समासः । कुम्भं करोतीति कुम्भकारः । इह कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । लडर्थाद्याधिक्येऽप्यदूरविप्रकर्षेण तूक्तं लौकिकं वाक्यं

"उपपदमतिङ्" ॥ 'एधानाहारको व्रजतीति' । 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायामि'ति ण्वुल् । 'अतिङिति किमिति' । येनाभिप्रायेण एवं तमाविष्करोति । 'ननु चेति' । 'एतज्ज्ञापयतीति' । स्यादेतत् । मुख्यस्य तिङन्तस्य प्रतिषेधोऽनर्थक इति यत्नेन समानार्थः सुबन्तस्तस्य

अर्थशब्दसन्निधाने इति। (कै)

तिङन्तशब्दरूपार्थकस्योपपदस्याभावादिति भावः॥

तिङर्थ उच्यत इति। (कै)

कस्य तिङर्थस्येति भाष्येऽपि तिङ्पदेन तदर्थो ग्राह्य इति भावः।

कस्येति (भा)

प्रश्नोऽपि तदर्थशब्दार्थप्रश्नद्वारा तच्छब्दार्थप्रश्न एवेति बोध्यम्॥

पुरुषः॥ (कै)

प्रत्यक्षादिः॥

उपग्रहः। (कै)

कर्त्रभिप्रायत्वादिः। यद्यपि कर्त्रभिप्रायत्वं न तिङर्थस्तथापि यथाकथंचित् द्योत्यं भवत्येवेति बोध्यम्॥

बोध्यम्। अतिङ् किम्। मा भवान् भूत्। माङिलुङिति सप्तमीनिर्देशान्माङुपपदम्। ननु सुपेत्यधिकारात्तिङन्तेन न भविष्यति। सत्यम्। तन्निवृत्तिरनेन ज्ञाप्यते। तत्फलं त्वनुपदमेव स्फुटीकरिष्यामः। प्रथमान्तन्तु सुप्ग्रहणमिहानुवर्तत एव। अत एव राजदन्तादौ पूर्वपदे नलोपादि-

---

प्रतिषेधो विज्ञायते, तत्र यद्यपि कालकारकसंख्योपग्रहयुक्तः पूर्वापरीभूतः क्रियारूपस्तिङन्तार्थप्रधानोऽर्थो न सुबन्तस्य सम्भवति तथापि क्रियावाचित्वमात्रेण तदर्थत्वमाश्रीयते, क्रियावाचुपपदं न समस्यत इत्यर्थः, तेन कारको गतः कारकस्य व्रज्येति गतव्रज्याशब्दयोः कारकशब्देन समासो न भवति, अन्यथा हि क्रियार्थायामिति सप्तमीनिर्देशेनोपपदत्वादनयोरपि समासः स्यादिति। तन्न, अनुपपदत्वात्, क्रियायां क्रियार्थायामिति

तिङर्थ (कै)

दृत्यस्य तिङन्तार्थं दृत्यर्थः ॥

अनेकार्थेति। (कै)

कालसाधनादिरूपेत्यर्थः ॥

साध्यत्वादिति। (कै)

साधनसाध्यत्वेन शब्दप्राधान्यादित्यर्थः ॥ तिङ्ग्रहणमपनीय क्रियापदग्रहणे लाघवं दर्शयति

यदीति ॥ (कै)

अतिङ्ग्रहणादिति। (कै)

अक्रियाग्रहणादेत्यपि बोध्यम् ॥ नन्वत्र गतशब्दस्य सत्त्वप्रधानतया कथं क्रियावाचित्वमित्याशंक्याह

अत्र चेति। (कै)

द्रव्यवाचित्वे प्रत्ययानुपपत्तिः। क्रियावाचित्वे तु उपपदसमासो

पदकार्यं सिध्यति। सुप्तुपेतीह नानुवर्त्तत इति भाष्यवृत्त्यादिग्रन्थास्तु मिलितं नानुवर्तत इत्येवं पराः। अतिङिति नोपपदस्य विशेषणं किन्तु समासस्येति। यद्यपीह भाष्ये न स्पष्टं तथापि अनवक्लृप्त्यमर्षयोरिति सूत्रे भाष्य एव स्पष्टम्। तत्र हि किंवृत्तस्यानधिकारादकिंवृत्तग्रहणानर्थक्यमि-

---

सप्तमीनिर्देशेन क्रियावाचिन उपपदत्वं धातुरेवात्र क्रियावचनस्तदाश्रयश्च गवुलप्रत्ययो गतशब्दस्तु क्रियोपसर्जनं कर्त्तारमाह व्रज्याशब्दोऽपि यस्तस्य सिद्धता नाम धर्मस्तत्र घञादयो भवन्तीति धात्वर्थस्य सिद्धतायां वर्तन्ते, अतो यत्क्रियावाचित्वादुपपदं न तत्सुबन्तं यत्सुबन्तं न तत्क्रियावाचि नाप्युपपदमिति नार्थ एवमर्थेनातिङ्ग्रहणेन। 'एतयोर्योगयोरिति'। ननु चास्मि-

दुर्वार इति तङ्शानचित्यर्थनक्रियाग्रहणमिति भावः ॥ इदानीमेव क्रियावाचित्वोपपादनादाह

सुबन्तेति । (कै)

उपपदविशेषणमित्यर्थः ॥

नैव क्रियावाचीति । (भा)

भाष्यस्य नैतत्प्राधान्येन क्रियावाचीत्यर्थः ॥ नन्वेवमत्र समासो दुर्वारोऽत आह

अत एवेति ॥ (कै)

प्रत्ययोत्पत्तिनिमित्तमुपपदत्वं च न गतग्रहस्य किं तु धातोरेवेत्याह

धातोश्चेति । (कै)

अन्यथा भावेऽपि सामर्थ्यादुपपदत्वमित्यभिमानः ॥ ननु प्रत्ययोत्पत्तिवत्समासोऽपि स्यादत आह

धात्वर्थस्येति । (कै)

त्युक्ता उपपदसंज्ञार्थं तर्हीत्याद्यंक्त्यातिङिति समासप्रतिषेधात्संज्ञानर्थक्यमिति सिद्धान्तितम् । एवं पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्य तेनाप्यतिङ्ग्रहणं सम्बन्धनीयम् । गतिः समस्यते अतिङन्तश्च समासं स्यादिति ।

नैव योगे तदनभिसम्बन्धो युक्तो यत्रातिङ्ग्रहणमस्ति न पूर्वत्र, एवं मन्यते, योगविभागेनातिङ्ग्रहणं पूर्वसूत्रेणापि सम्बन्धनीयमिति । यद्येवं कुग्भ्रुद्भे प्रादिषु चातिप्रसङ्गः, तत्रापि प्राक् सुबुत्पत्तेः समासः स्यात्, एवं तर्हि पूर्वसूत्रे गतिग्रहणं पृथक्कृत्य तेनैवातिङ्ग्रहणं संबन्धनीयं, गतिकारकोपपदानामस्यायमर्थः, गतीनां कारकाणामुपपदानां च क्रुद्भिः सह यः

एवं च तन्नाचस्यान्येनैकार्थीभावासम्भव इति भावः ॥ वस्तुतस्तु नैतत् क्रियावाचीत्यनेनाच तुमुन्ण्वुलाविति ण्वुलेव नेति बोध्यते ॥

क्रियार्थायामिति । (पा)

स्त्रीलिङ्गनिर्देशेन क्रियार्थायाः क्रियायाः एव लाभे पुनः क्रियाग्रहणेन प्राधान्येन साध्यमाचावस्यक्रियाप्रतिपादकस्यैव ग्रहणात्किं च क्रियाशब्देन क्रियावाचकशब्दग्रहणे क्रियाप्रधानभूता साध्यावस्थैवा च गृह्यते इति गतिकारकोपपदादिति सूत्रेऽपि भाष्ये स्फुटम् । अर्थग्रहणे तु गुणीभूताया अपि ग्रहणमिति पाकादियोगे कारकविभक्तिकत्वसुजादीनां साधुत्वं भवत्येवेत्याशयः । अन्यथा सिद्धान्ते कारको गत इत्यत्र समासो दुर्वारः स्यात् । किं च क्रियावाचित्वाभावादत्राप्युदाहरणत्वं तुमुनन्तं भवतीत्यस्यान्याय्यत्वात् । कैयटोक्तरीतिस्तु "अनुपसर्जनाद्" (४।१।१४) "येनविधिः" (१।१।७२) "समर्थः पद" (१।२।१) इत्यादि सूत्रभाष्यविरुद्धा । तत्र हि निष्कृष्यैकार्थीभावं विनापि समासतद्धितादिप्रवृत्तेरङ्गी-

---

तेन प्रयवतीत्यादौ तिङन्तेन समासो न । अतिङ्ग्रहणाच्च सुपेति तृतीयान्तं निवर्त्तते । तथा च गतिकारकोपपदानां कृद्भिः सहसमासवचनं प्राक्सुबुत्पत्तेरिति प्राचां परिभाषा एकदेशानुमतिद्वारा सामान्यापेक्षज्ञापक-

---

समासस्तेनतेन लक्षणेन स उत्तरपदात्सुबुत्पत्तेः प्रागेव कार्यः पूर्वपदन्तु सुबन्तमेव समस्यत इति, गतीनां तावत्, व्याजिघ्रतीति व्याघ्री, 'घ्राध्मा-धेट्दृशः श' इति प्राप्तस्य जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्य इति निषेधा 'दातस्योपसर्ग' इति कः, व्याङोर्घ्रशब्देन गतिसमासः स यद्युत्तरपदे सुबन्ते जाते पश्चात्स्यात्ततः सुबुत्पत्तये संख्याकर्मादियोगो विवक्षितव्यः,

कारात् । न चैवमपि कारको व्रजतितरामित्यत्र समासाभावार्थ-प्रतिषेध आवश्यकः । अनभिधानेन तत्र तादृग्प्रयोगाभावादिति भाष्याशयः ॥

उपसंहृतक्रमरूपाम् । (कै)

उपसंहृतक्रमत्वसमानाधिकरणवैजात्यविशेषरूपाम् ॥

प्रधानमिति । (कै)

प्रत्ययार्थवैजात्येन लिङ्गाद्यनन्वयरूपप्रकृत्यर्थवैजात्यकार्याभिभवात्तस्य प्राधान्यमिति भावः । एवं चात्रापि न एवुञिति तात्पर्यं भाष्यस्येति बोध्यम् ॥ भाष्ये

एवं तर्हि सिद्धे इति । (भा)

तादृग्प्रयोगाभावादतिप्रसङ्गनिरासे सिद्ध इत्यर्थः ॥

एवं तर्हि योगविभाग इति । (कै)

अत्रातिङिति पूर्वसूत्रे गतिरिति चेत्यर्थः ॥

अतिङ्ग्रहणेन चेति । (कै)

भूतेन अतिङ्ग्रहणेन लभ्यते । गतीनां कारकाणामुपपदानां च कृद्भिः सह यः समासः स उत्तरपदात्सुबुत्पत्तेः प्रागेव कार्य इत्यर्थः । पूर्वपदन्तु सुबन्तमेवेत्युक्तम् । गतीनां तावत् । व्याजिघ्रतीति व्याघ्री । आतश्चोपसर्ग इति

तद्योगाच्च प्रागेव लिङ्गयोगः स्वार्थमभिधाय घ्रब्द इति न्यायात्, ततश्च लिङ्गनिमित्तः प्रत्ययो भवन् घ्रघ्रब्दमात्रस्याजातिवाचित्वादाप् स्यात्, ततश्च व्याडोर्घ्राघ्रब्देन समासस्ततो व्याघ्राघ्रब्दस्य जातित्वेऽप्यनकारान्तत्वाज्जातिलक्षणो ङीष् न स्यात्, प्राक् सुबुत्पत्तेः समासो भवन् लिङ्गयोगमपि नापेक्षत इत्यन्तरङ्गत्वात्स एव तावद्भवति पश्चात्स्त्रीप्रत्ययो भवन्ङीषेव

अतिङन्तस्य प्रथमान्ततया समास एव विधेयते। अतिङिति बहुव्रीहिः॥

गतिकारकेति। (भा)

प्रपचतितरामित्यादौ नित्यसमास दृष्ट एव। "तिङिचोदात्तवती" त्यनेन गतेर्निघातेऽन्तोदात्तत्वमेव। तच एतत्सिध्यर्थमेव तिङ्ग्रहणं प्रत्याख्यायते भाष्ये। स्वरस्य तु नाच प्रवृत्तिः छन्दग्रहणात्। छन्दग्रहणप्रत्याख्यानं तु न भाष्यारूढमिति तत्रैव वक्ष्यामः। एतेन तच नित्यसमासवारणायातिङिति तद्घटितप्रतिषेधायावश्यकमिति कथं तच तन्निवृत्तिज्ञापकं प्रपचतितरामित्यादौ च "गतिकारकोपपदादि"ति "तिङिचोदात्तवती"ति सूत्रभाष्यप्रामाण्येन "उदात्तवते" त्यादिवार्त्तिकोक्तो वैकल्पिकसमास एवेष्यते इति परास्तम्॥

सुप्ग्रहणं त्विति। (कै)

उपपदमित्यत्रर्थसंज्ञया सुबन्तस्यैव पदत्वेनोपपदत्वात् गतेः सुबन्तत्वाद्राजयुध्वेत्यादौ पूर्वपदेन ङीपादिपदकार्यसिद्धेः॥ तिङ्-

---

कः। पाघ्राध्मेति ग्रप्रत्ययस्तु न भवति। जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्य इत्युक्तेः। व्याङोर्घ्रग्रब्देन गतिसमासः। स च यदि घ्रग्रब्दस्य सुबन्ततामपेक्षेत तर्हि सुब्युत्पत्तये संख्याकर्मादियोगो विवक्षणीयः। तद्योगाच्च प्रागेव

भवति, पूर्वपदस्य तु सुबन्तत्वात्पदकार्याणि भवन्ति, निर्गत इति रत्वं, संध्यक्षेति परसवर्णविकल्प इत्यादीनि। कारकाणाम्, अभ्रेलिह्माऽभ्रलिहौ, 'कर्टकरणे कृता बहुल'मिति समासः, यद्युत्तरपदस्य सुबन्तत्वं स्यात्पूर्ववट्टाप् स्यात्ततः 'क्रीतात्करणपूर्वात्' 'क्षुद्रजन्तुभ्यो'रिति ङीष् न स्याद्

घटित इति समासविशेषणेन कारको व्रजतीत्यादिव्यावृत्तिसिद्धेः प्रथमान्तसुबन्तवृत्तेरपि फलाभावेन चिन्त्यमेतत् ॥

कृदन्तावस्थायामेवेति । (कै)

काष्ठैः पचतितरामित्यादिवारणाय कृद्ग्रहणस्यावश्यकत्वेन चिन्त्यमिदमिति कश्चित्तन्न बहुलग्रहणेन ज्ञानजन्तादिभिरिव तेनापि समासस्य वारयितुं शक्यत्वात् परिभाषायाः प्रयोजनवत्त्वे ह्यतिङ्ग्रहणं प्रयोजनवत्स्यादत आह

अस्याश्चेति ॥ (कै)

तन्निबन्धनः स्वर इति । (कै)

"गतिकारकोपपदात् कृदिति" विहित इत्यर्थः ॥ स्वरासिद्ध्यर्थमेवाह

यद्वेति ॥ (कै)

सुपेत्यस्य निवृत्ताविति । (कै)

सुपैवेति नियमाभावाद्यथेष्टं समाससिद्धिरितिभावः ॥ लक्ष्या-

लिङ्गयोगः स्वार्थमभिधायेत्यादिन्यायात् । ततश्च लिङ्गनिमित्तः प्रत्ययो भवन् टाबेव स्यात् न तु ङीष् । घ्रशब्दसाचस्य अजातिवाचित्वात् । ततश्च व्याङोर्घ्राशब्देन समासः । ततो व्याघ्राशब्दस्य जातिवाचित्वेऽप्यनकारान्त-

---

अत इत्यधिकारात् वचनसामर्थ्याद्वा पूर्वशब्दं व्यवस्थावचनमाश्रित्य वाक्यावस्थायामेव स्यात्, अत इत्यधिकारो वा व्यवच्छिद्येत, प्राक् सुबुत्पत्तेः समासे पूर्ववत्सिद्धमिष्टम् । अत्रापि पूर्वपदस्य सुबन्तत्वाच्चर्मकृतीत्यादौ नलोपादिकार्याणि भवन्ति । उपपदानां कच्छेन पिबतीति 'सुपि स्थ' इत्यत्र सुपीति योगविभागात्कः, कच्छपी, व्याघ्रीतुल्यं, माषान्वपति 'सुप्य-

नुमारेण च व्यवस्थेति बोध्यम्। तच्च सुबुत्पत्तेःप्रागित्युपलक्षणं लिङ्ग-बोधकप्रत्ययोत्पत्तेः प्रागपीति बोध्यम् ॥

सुबुत्पत्तेरिति । (कै)

सुबुत्पत्तेरनन्तरमित्यर्थः ॥

धनक्रीतेति । (कै)

सुप्टाबुत्पत्तेः पूर्वं समासे "क्रीतात्करणे"तिङीप् स्यात्। सुबन्तेन तु समासेऽन्तरङ्गत्वाट्टाप् सिध्यतीति भावः॥ यच्च सुबुत्पत्तेः पूर्वं समासस्तत्र स्वराप्राप्तेराह

उत्तरपदशब्द इति ॥ (कै)

सुबित्यस्येति । (कै)

तदनुवृत्तावपि प्रागुक्तरीत्या पदविधित्वं बोध्यम्॥ सुपेत्यस्या-ननुवृत्तातिप्रसङ्गमाह भाष्ये

यद्येवमिति । (कै)

त्वाज्जातिलक्षणो ङीष् न स्यात्। सुबुत्पत्तेः प्रागेव जायमानस्तु समासो लिङ्गयोगानपेक्षत्वेन अन्तरङ्गत्वाद्भवति। ततो ङीप्पूर्वपदस्य तु सुबन्तत्वात्पदकार्याणि स्युरेव। निर्गत इति रुत्वं सप्यँस्तेति परसवर्णविकल्प इत्यादि।

जातौ णिनिस्तात्कील्ये' माधवापिणी, ङीपः प्राक् समासे प्रातिपदिकस्यान्तो नकार इति णत्वं भवति, सुबन्तस्य तु समासे ङीप्समासस्यान्तो न तु नकार इति न स्यात्, अत्रापि पूर्वपदस्य सुबन्तत्वाच्चर्मकारादौ नलोपादिपदकार्यं भवत्येव। अत्रोपपदग्रहणं गतिकारकव्यतिरिक्तोपपदपरिग्रहार्थं माधवापिणी,। ईषद्पूर्णाया अपत्यं ऐषदपूर्णेयः, अत्र दर्शशब्देन समासे सति समुदायात्स्त्रीभ्यो ढकं बाधित्वा दर्शादिशब्दात् स्त्रीप्रत्यय-

"क्रुगतौ"त्यनेनेति भावः॥ "अतिङि"त्यनेन तिङन्तस्यैव प्रतिषेध इति तात्पर्यम्॥

ऐकस्वर्यादीति। (कै)

आदिनैकपद्यं किं च तयोः समासे प्रातिपदिकतया परत्वात्सुत्पत्तिरेव स्यान्न तिङित्यपि बोध्यम्॥

पूर्वं धातुरुपसर्गेणेति। (भा)

तत्संज्ञकशब्देनेत्यर्थः॥ पूर्वं साधनेन योगेऽपि उपसर्गस्य क्रियाविशेषकत्वाविशेषात्सामर्थ्यस्य दुर्वारत्वमित्यत आह

ततश्च पूर्वमिति। (कै)

साधनसंसृष्ट एवोपसर्गेण युज्यत इति केवलेन सामर्थ्याभाव इति भावः॥ न च निष्कृष्यैकार्थीभावो न समासादिप्रयोजक इत्युक्तम्। एवं च विग्रिष्टेनैकार्थीभावे ऽवयवानामपि तत्सत्त्वात्स दुर्वार इति वाच्यम्। तिङन्तेनैकार्थीभावाभावात्। अतिङिति निषेधात् तदवयवेन तु प्रत्ययार्थासंसृष्टेन नैकार्थीभावः साधनसंसृष्टार्थस्यैवोपसर्गेण योगादित्यदोषात्॥ भाष्ये

कारकाणाम्। अश्वैः क्रीता। अश्वैरश्वेर्लिप्ता। कर्तृकरणे कृताबहुलमिति समासः। स यद्युत्तरपदस्य सुबन्तस्य स्यात्तर्हि पूर्ववट्टाप् स्यात्। ततश्च क्रीतात्करणपूर्वात् क्तादल्याख्यायामिति ङीष् न स्यात्। अत इत्यधिकार-

---

लक्षणो ठक् स्यात्, स्त्रीप्रत्यये तदादिनियमाभावेऽपि दर्शाग्रशब्दादपि कदाचित्स्यादित्येषा दिक्, जातान्यस्याः परिभाषायाः प्रयोजनानि। कथं पुनरतिङ्ग्रहणेनायमर्थः साधयितुं शक्यः, यावता प्रथमान्तमतिङ्ग्रहणं प्रथमान्तस्यैव सुबग्रहणस्य निवृत्तिं सूचयेदिति पूर्वपदे पदकार्याणि न स्युः,

साधनं हि क्रियां निर्वर्त्तयतीति । (भा)

क्रियां तत्प्रतीतिं साध्यत्वेन प्रतीतेः । तत्संबन्धाधीनत्वात् साध्यत्वेन प्रतीतार्थकयोगे च तेषामुपसर्गत्वादिति भावः ॥

अभिनिर्वृत्तस्य । (भा)

अभिनिर्वृत्तज्ञानविषयस्येत्यर्थः ॥

अनिष्पन्नस्येति । (कै)

अज्ञातस्येत्यर्थः ॥ नन्वेवमुपसर्गसम्बन्धात् प्राक् केवलभावादेः सकर्मकत्वाभावेन कर्मणि क्त्वादयो न स्युरत आह

अनुभूयते सुखमिति ॥ (कै)

धातुरेवेति । (कै)

केवलधातुरेवेत्यर्थः ॥

उपसर्गस्तु द्योतक इति । (कै)

स च श्रोतृबोधाय पश्चादेव सम्बध्यते इति भावः ॥ एतेनोप-

रात् । वचनसामार्थ्यात्स्यादिति चेत्तर्हि वाक्यावस्थायां स्यात् । पूर्वशब्दस्य व्यवस्थावचनत्वसम्भवात् । अत इत्यधिकारो वा व्यवच्छिद्येत । तथा च सा हि तस्य धनक्रीता प्रासेभ्योऽपि गरीयसीति भट्टिप्रयोगे न सिध्येत् ।

उत्तरपदे चोक्तमिदं न सिध्यति तदेतत्क्त्वियमाणप्रतिङ्ग्रहणं विपर्ययमेव साधयति तदपि गत्युपपदयोरेव कारकेषु तु 'कर्तृकरणे कृता बहुलमि"त्यादावस्याः कथाया अप्रसङ्ग एव, उच्यते । योगविभागेनातिङ्ग्रहणं गतिनापि संबध्यत इत्युक्तम्, एवं स्थिते योगद्वयविहितसमासमतिङ्ग्रहणेन विशेषयिष्यामः, गतिः समस्यते अतिङ् समासो भवति उपपदं समस्यते अतिङ्च समासो भवतीति, तदेवं 'माङि लुङ्' माकार्षीदित्यादौ

सर्गाणां द्योतकत्वेऽपि तद्द्योत्यार्थस्य साधनसम्बन्धात् पूर्वमेव धातुना बोधनावश्यकत्वेन धातूपसर्गयोः सामर्थ्यसत्त्वेन समासो दुर्वार इत्यपास्तम्। एतच्च "सुङ्कादि"त्यत्र विस्तरेणोपपादयिष्यते। "विपराभ्यां जेरि"त्यादौ व्यादिद्योत्यार्थप्रतिपादकत्वेत्यर्थः। विपराभ्यां परत्वयोग्यत्वेत्यर्थो वा॥

विरोधसद्भाव इति। (कै)

इत्यभिमान इति शेषः। अभिमानत्वं वा ऽस्यानुपदमेव स्फुटीकरिष्यते॥ ननु कर्म्मण्युपपदे ऽण् कर्म्मत्वं च विभक्त्या गम्यं तच्चाणुत्पत्तेः पूर्वं कृदन्तत्वाभावात्षष्ठ्या अप्राप्तौ द्वितीययैव भाव्यमिति जातेऽपि अणि तन्निवृत्तौ मानाभाव इति कुतः षष्ठीसमासप्राप्तिरत आह

पञ्चके इति। (कै)

प्रातिपदिकस्य पदत्वाभावादुपपदत्वं कथमिति चिन्त्यमेतत्॥

सुबन्तमेवोपपदमिति। (कै)

सिद्धान्ते तु कर्तृकरणे कृतेत्यत्र बहुलग्रहणात्क्वचित्सुबन्तेन समासः, अतो न ङीष्। उपपदानाम्। कच्छेन पिबतीति कच्छपी। व्याघ्रीवत्। सुपीति योगविभागात्क इत्यादि। यत्त्वतिङ्ग्रहणमुपपदविशेषणमिति। तन्न।

तिङन्तेन समासो मा भूदित्येवमर्थं क्रियमाणमतिङ्ग्रहणं सुपेति वर्तीयान्तस्य निवृत्तिं साधयतीति गत्युपपदयोस्तावत्सिद्धमिष्टं, वृत्तावपि सुप् सुपेति न संबध्यत इति समुदायस्य निवृत्तिर्विवक्षिता न केवलस्य सुब्ग्रहणस्य प्रत्युदाहरणमपि दिङ्मात्रं प्रदर्शितं न हि तत्र तिङन्तेन समासः किं तर्हि तिङन्तस्य सुबन्तेन, 'कर्तृकरणे कृता बहुल'मित्यत्रापि कृतेति न वक्तव्यं, कथं, कर्तृकरणयोः क्रियापेक्षत्वात्क्रियावचनेन तावत्समासः

"तत्रोपपदमि"तिसूत्रे भगवान्वक्ष्यति स्वयं च। किं च पञ्चकपचेऽपि सकलकारकशक्तिमानर्थः संमुग्धाकारेणैव प्रातिपदिकेनोच्यते न तु विशिष्य इतिकर्मोपपदत्वप्रयुक्ताणोऽप्राप्तिः। अन्यथा करणाद्युपपदेऽपि कर्मोपपदप्रसंगः। तस्मादस्तुतः क्तप्रकृत्यर्थकर्मत्वमत्त्वेन कृदनुत्पत्तावपि भावितत्वं गृहीत्वा षष्ठीप्रवृत्तिरित्येव भाष्याशय उचितः॥

अतरङ्गत्वादिति। (कै)

षष्ठीति सूत्रे सुपेति तृतीयान्तस्य संबन्धादिति भावः। अत एव मातुः स्मरतीत्यादौ न षष्ठीसमासः। अत एव च षष्ठ्यन्तस्यानेक सुबन्तेन न समास इति बोध्यम्॥ एतद्वार्त्तिकद्वयमपि प्रत्याचष्टे।

अथवेति। (भा)

भाष्ये "विप्रतिषेधे परमि"त्यस्य तु न प्रवृत्तिः। युगपदुभयविहिततत्पुरुषसमासमंज्ञयोः प्रवृत्तिसंभवेनासंभवरूपविप्रतिषेधाभावात्। उपपदसमासो भविष्यतीत्यस्य "उपपदमि"ति सूत्रविहितसमासमंज्ञा तत्पुरुषसंज्ञा च स्यास्यतीत्यर्थः। अन्यादृग्विरोधस्य तत्प्रवृ-

---

तथा सति प्रथमान्तसुबग्रहणस्य निवृत्त्यापत्त्या बहुविघ्नवापत्तेः। एतेनातिङ् किम् एधानाहारको व्रजतीति प्रत्युदाहरणमपि प्रत्युक्तम्। यदपि कौमुद्यां कुगतीति सूत्रे उक्तं, अत्र सुप्सुपेत्यनुवृत्तेस्तिङापि समासः ऊरी-

---

धातुश्च क्रियावचनो, धातोश्च द्वये प्रत्ययाः कृतस्तिङश्च तत्र सुबधिकारात् तिङन्तेनाप्रसङ्गः, तदेतत्कृद्ग्रहणं कृदन्तावस्थायामेव यथा स्यादित्येवमर्थमिति केचित्, नेति वयं, काष्ठैः पचतितरां दध्ना भुक्तपूर्वीत्यादौ तद्धितान्तेन समासो माभूदित्येवमर्थं कृद्ग्रहणं कर्त्तव्यं कष्टश्रितादिषु प्राक् सुबुत्पत्तेः समासो न साधित इति कष्टश्रितेत्यादि न सिद्ध्यति एवं तर्हि

क्तिनिमित्तत्वे न मानमिति तात्पर्यम्। न च नित्यत्वानित्यत्वज्ञानयोर्विरोधः। बोधे बाधज्ञानस्याप्रतिबन्धकत्वात्। एवं च षष्ठीसमासोऽपि नित्य एवैतद्विषये फलितः। तद्बोधिताभावांशस्यैतद्विरोधेनैतद्विषये त्यागात्। "नित्यं क्रीडे" त्यादिविषये तस्य क्लृप्तबाधत्वाद् "गतिकारकोपपदादि"त्यत्र प्रकृतपरिभाषायां च लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्त्तते इति षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव स्वरस्य। तत्रापि समासे इत्यन्तरङ्गत्वमेव नास्तीति भावः। परिभाषायां सामान्यतः कारकपदोपादानेन कारकविभक्त्यन्तसमासमात्रस्य सुबुत्पत्तेः प्राक्तद्भिन्नलाभाद् इति बोध्यम्। कैयटे "सिद्धित्यसमासयोरि"त्यादिर्ग्रन्थोऽशुद्धेषु पुस्तकेष्वनुपलम्भात्तत्रनित्यग्रहणप्रत्याख्यानाच्च ॥

उत्तरपदेति। (कै)

एवं चाग्निचितेत्यादौ विभक्त्युदात्तत्वमपि स्यादिति भावः ॥

करोतीत्यादि। तदप्यसत्। तत्र शेषोक्ततेनातिङ्ग्रहणेनैव विरोधात्। तिङ्समासस्तु सहेति योगविभागबललभ्यो वार्त्तिकोक्तविशेषविषयच्छान्दसश्चेति प्रागेव प्रपञ्चितम् ॥

गतिकारकोपपदानमिति परिभाषा पूर्वाचार्यैः पठिता सूचकारेणाप्यतिङ्ग्रहणेन तद्देश आश्रिता, तत्र सामान्यापेक्षं ज्ञापकमिति कृत्स्नमेव परिभाषार्थं ज्ञापयतीति सिद्धमिष्टम्।

तदेतत्प्रतिपद्यन्तां भाष्ये कृतपरिश्रमाः।
नान्ये सहस्रमप्यन्याः सूर्यं पश्यन्ति नाञ्जसा ॥

अमैवाव्ययेन । २ । २ । २० ॥

नन्वेवं वचनवैयर्थ्यमतस्तत्सामर्थ्यात्सुबुत्पत्त्यनन्तरमपि समासो ज्ञाप्यते इत्यत आह

नियमान्तरे इति । (कै)

वक्ष्यमाणे इत्यर्थः ॥

अमैवाव्ययेन ॥ अमैव तुल्यविधानं यदुपपदन्तदेवाव्ययेन सह समस्यते । खादुङ्कारं भुङ्क्ते । संपन्नंकारं लवणंकारम् । खादुमि णमुल् खादुमीत्यत एव निपातनात्पूर्वपदस्य मान्तत्वम् । खादुमीत्यर्थग्रहणं सम्पन्नलवणशब्दावपि खादुपर्यायौ येन वाक्येनासेव केवलो विधीयते न तु प्रत्ययान्तरसहितः । तस्मिन् वाक्ये सप्तमीनिर्देशबलेन यस्योपपदसंज्ञा तदमैव तुल्यविधानमित्युच्यते । सूत्रे च तुल्यविधानमित्यध्याक्रियते । नियमाङ्ग-

---

"अमैवाव्ययेन" ॥ 'खादुंकारमिति' । 'खादुमि णमुल्', खादुमीत्यत एव निपातानात्पूर्वपदस्य मान्तत्वम् । खादुमीत्यर्थग्रहणं तेन संपन्नंकारमित्यत्रापि भवति । ननु सिद्धे विधिरारभ्यमाणो नियमाय भवति एवकारः किमर्थः, इष्टतोऽवधारणार्थः, एवं यथा विज्ञायेत अमैवाव्ययेनेति, नैवं विज्ञायि अमाव्ययेनैवेति, अनव्ययस्यासम्भवादेवायं नियमो न भविष्यति, ननु चायमस्ति खश्यं ब्राह्मणकुलमिति, 'अधिकरणे शेते'रित्यच्, 'अतोमिति' सोरम्भावः । अनेनानव्ययेन समासो माभूदित्येवमर्थो नियमः स्यात् न, अत्र ह्युत्तरङ्गत्वादनुत्पन्न एव सावुपपदसमासेन भाव्यं पश्चात्सुपेति विधानवेलायामनव्ययस्यासम्भवान्नियमान्तरेण वचनस्य

अमेत्यस्यावृत्तिरिति। (कै)

चिन्त्यमेतत्। आवृत्तौ मानाभावात्। अमैव तुल्यविधानं यदुपपदं तदमाव्ययेन समस्यते इत्यर्थे अग्रेभुक्त्वा इत्यत्र समासापत्तिरव्ययग्रहणवैयर्थ्यापत्तिश्च। किं च कालो भोक्तुमित्यत्र समासापत्तिस्तस्मादमैव तुल्यविधानं यदुपपदं तदमाव्ययेनेति नियमेन सर्वेष्टसिद्धिः। अत एव भाष्ये ऽग्रेभुक्त्वेत्युदाहृतम्। [१]"अग्रादिषु

---

१ अग्रादिष्वप्राप्तविधेः समासप्रतिषेधं चोदयिष्यति स न वक्तव्यो भवति (अत्रैवभाष्ये)॥ अथाप्राप्ते अग्रादिष्वप्राप्तविधेः समासप्रतिषेधः (वा)॥ ३। ४। २४॥

भूतस्त्वेवकारो नियमस्त्वभावादेव लभ्यते न तु सूत्रारूढः। अमैव च यत्तुल्यविधानं तस्य प्रत्ययान्तरं प्रति उपपदत्वमेव नास्तीति अव्ययान्तरेण सह समासो नाशङ्कनीयः। सूत्रस्य प्रयोजनन्तु कालसमयवेलासु तुमुन्, कालः समयो वेला वा भोक्तुमित्यत्र समासनिवृत्तिः। अमैवेति किम्। अग्रेभोजं अग्रेभुक्त्वा, विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ। अमाचान्येन च तुल्य-

---

चरितार्थत्वाद्विपरीतनियमो न भविष्यतीत्यत आह। 'एवकारकरणमिति'। अमैव यदुपपदं तत्समस्यते तदेव समस्यत इत्यत्तरार्थो न पुनरमैव समस्यत इति, तत्रामैव यदुपपदमित्यत्र तुल्यविधानमिति वाक्यशेषः, किं चामैव तुल्यविधानं येन वाक्येनामैव केवलो विधीयते न प्रत्ययान्तरसहितत्वेन वाक्येन यदुपपदं विधीयत तत्र सप्तमीनिर्देशात्तदमैव तुल्यविधानं, नियमाङ्गभूतस्त्वेवकारो नियमस्त्वभावादेव लभ्यते अमैव यत्तुल्यविधानं न तु प्रत्ययान्तरोत्पत्तौ निमित्तमिति तदपेक्षया ऽनुपपदत्वाद्

अप्राप्ते"ति वार्त्तिकप्रत्याख्यानं च सङ्गच्छते इत्याहुः॥ "अप्राप्त-विधेरि"ति विशेषणव्यावर्त्त्यमुपपादयति

प्राप्तविभाषायां त्विति। (कै)

आभीक्ष्ण्य इत्यनुवृत्त्या हि सा तस्मिंश्च सत्येव प्रत्यय इत्याद्युक्तेः प्रत्ययोत्पत्तिसन्नियोगेनैवोपपदसंज्ञास्वीकारादिति भावः॥

विधानमेतम्। अव्ययेनेति किम् कुम्भकारः। असति ह्यव्ययग्रहणे अमैव यत्तुल्यविधानन्तदेव समस्येत। न च पूर्वसूत्रस्थानवकाशत्वादव्ययविषय एव नियम इति वाच्यम्। तथासत्यमैव नियमापत्तेः। अमन्तेनोपपदस्य यस्समासः सोमैव तुल्यविधानस्येति। तथा चाग्रेभोजमित्यत्र मा भूत। अग्रे-भुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेव॥

अव्ययान्तरेण समासो नाशङ्कनीयः। 'अग्रभोजमिति'। 'विभाषाग्रे-प्रथमपूर्वेष्वि'ति क्त्वाणमुलौ, अव्ययग्रहणं किम्। असत्यव्ययग्रहणे अमैव तुल्यविधानं तदेवोपपदं समस्यत इत्युच्यमाने कुम्भकारादावपि न स्यात्, अथ पूर्वसूत्रस्थानवकाशत्वादमैव तुल्यविधानस्योपपदस्याव्ययविषयत्वात्त-द्विषय एव नियमो विज्ञास्यत इत्युच्यते एवं त्वमैव नियमः स्याद् अमन्ते-नोपपदस्य यः समासः सोमैव तुल्यविधानस्येति, तत्र को दोषः, अग्रेभोज-मित्यत्रैव न स्यात्, अग्रे भुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेव, अव्यय-ग्रहणेतु सति अव्ययेनोपपदस्य यः समासः सोऽमैव तुल्यविधानस्येति विज्ञानान्न कश्चिद्दोषः॥

शेषो बहुव्रीहिः। २। २। २३॥

उपयुक्तादन्यः शेषः। सामान्यं "सह सुपे"त्यादिः। विशेषो "द्वितीयाश्रिते"त्यादिः॥

पूर्वोत्तरेति। (कै)

यद्यप्यन्यपदार्थवत् पूर्वोत्तरपदार्थयोस्तद्विधानं नास्ति च्छास्त्रे तथाप्यव्ययीभावादिमहासंज्ञाबलेन पूर्वाचार्यपरिगृहीतार्थस्य निमित्तत्वमस्त्येवेत्यभिप्रायः॥ [1]"विशेषणं विशेष्येणे"त्यादौ प्रथमाया अप्युपयुक्तत्वमित्यत आह

---

१ अ २। पा। १। सू ५७॥

शेषो बहुव्रीहिः॥ अधिकारोऽयम्। शेषः किम्। उन्मत्तगङ्गम्। प्राक्कडारात्परङ्कार्यमिति पाठे परत्वाद्बहुव्रीहिसंज्ञा मा भूत। उपयुक्तादन्यः शेषः। शिष अस्सर्वोपयोगे। कर्मणि घञ्। येषां पदानां यस्मिन्नर्थेऽव्ययी-

---

"शेषो बहुव्रीहिः"॥ 'उपयुक्तादन्यः शेष इति'। शिष अस्सर्वोपयोग इत्यस्मात्कर्मणि घञ्। 'कश्च शेष इति'। ननु चोपयुक्तादन्यः शेष इत्युक्तं, सत्यं, सर्वेषामेव पदानां सामान्यविशेषरूपेणोपयोगात्सर्वेषु च पूर्वोत्तरान्यपदार्थेषु यथायोगं तत्पुरुषाव्ययीभावयोर्विधानादुपयुक्तादन्यो न सम्भवतीति पुनः प्रश्नः, उक्तं च शेषग्रहं पदतच्छेदाभावादर्थतच्छेदविशिष्ट-

द्वितीयादीनामिति । (कै)

"गतार्थप्रथमये"त्यादि तु व्याख्यानभूतं न स्वतन्त्रविधायकमिति भावः ॥ यद्वा "प्रेष" इत्यस्य प्रथमान्तत्वात्प्रथमान्तगृहीतचिकस्य प्रतिपदमुच्चरितस्यैव ग्रहणमिति सर्वेष्टसिद्धिः ॥

इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते महाभाष्यप्रदीपोद्द्योते द्वितीयाध्यायस्य द्वितीयपादे प्रथमाह्निकम् ॥

भावादिसंज्ञा नोक्ता स बहुव्रीहिरित्यर्थः । एकसंज्ञाधिकारे तु चिकतः प्रेषो ग्राह्यः । तथाहि । सप्तसु सुपां चिकेषु यस्य चिकस्य प्रष्ठङ्ग्राहिकया समासो नोक्तः स प्रेषः ॥ प्रथमेति यावत् । ततश्च प्रथमान्तानां बहुव्रीहित्यर्थात्समानाधिकरणानां भवति । कण्ठेकाल इत्यादौ तु सप्तमीविप्रेषण इति ज्ञापकात्सिद्ध इति ॥

मिति । 'यत्रान्यः समासो नोक्त इति' । येषां पदानां यस्मिन्नर्थे ऽव्ययीभावादिकः समासो न विहितः स प्रेष इत्यर्थः । अथैवं कस्मान्न विज्ञायते सप्तसु सुपां चिकेषु यस्य चिकस्य प्रष्ठङ्ग्राहिकया समासो नोक्तो यथा प्रथमायाः स प्रेष इति, कण्ठेकाल इत्यादावप्रथमान्तानामपि समासस्येष्टत्वात्, प्रेषग्रहणं प्राक्कडारात्परं कार्यमित्यस्मिन्पक्षे कर्त्तव्यम्, एकसंज्ञाधिकारपक्षे न कर्त्तव्यमित्याकडारसूत्र एव प्रतिपादितम् ॥

महाभाष्यप्रदीपोद्योतः ।

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ।

कृते ऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥
अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ॥

अनेकमन्यपदार्थे । २ । २ । २४ ॥

भाष्ये क्रमोल्लङ्घनेऽभिप्रायमाह

अनेकेति ॥ (कै)

चित्रगुः । चित्रा गावो यस्येति विग्रहः । चित्र गोसम्बन्धीति समासार्थः । यत्सम्बन्धिनाश्चित्रा गाव इति विग्रहे बोधः । वृत्तौ विशेष्य-विशेषणभावव्यत्यासः । यत्तु बहुव्रीहौ अन्यपदार्थे उत्तरपदस्य लक्षणानि च गोपदेनैव गोस्वामिलक्षणायां तत्र चित्रपदार्थानन्वय एकदेशत्वादिति वाच्यम् । चित्रपदस्य तात्पर्य्यग्राहकतया गोपदेनैव चित्रगोस्वामि-

---

अनेकमन्यपदार्थे ॥ अनेकं सुबन्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः । पदेन प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयत इति स्थिते चित्रतः शेषस्योक्ततया अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति फलितं चित्रतः

"अनेकमन्यपदार्थे" ॥ 'अनेकं सुबन्तं सह समस्यत इति' । परस्परमित्यर्थः । तदनेन सुबित्येतदत्रानुवर्त्तते न सुपेत्येतद्, उत्तरपदस्याप्यनेक-

अन्यपदार्थो लभ्यते इति। (कै)

"अन्यार्थे" इत्यस्य भिन्नेऽर्थ इत्यर्थः। भेदप्रतियोगी चोपस्थितः स्वपदार्थ एव पर्युदासविधया च स पदार्थ एवेति भावः॥ वाक्यव्यावर्त्तकं युक्त्यन्तरमाह

वर्त्तीति। (कै)

तेषां सुबन्तत्वादित्यभिमानः॥

एतानि पदानीति। (कै)

समानाधिकरणानामित्यनपेक्ष्येदम्। वस्तुतोऽर्थपरमेतत्। यथा मदीया मातेत्यत्र समासप्रसङ्ग इति बोध्यम्॥ सुस्नातं भो इति पाठे आह

लक्षणान्न दोषः। एवं प्राप्तोदकग्राम इत्यादौ उदककर्त्तृकप्राप्तिकर्मीभूतो लक्ष्यते प्राप्तपदं तात्पर्य्यग्राहकम्। प्राप्तिकर्त्रभिन्नमुदकम् इति बोधोत्तरं स्वकर्त्तृकप्राप्तिकर्मत्वसम्बन्धेन तत्सम्बन्धिग्रामे लक्षणेति तु न युक्तम्। उदककर्त्तृकप्राप्तिकर्मग्राम इति विवक्षितार्थानिर्वाहात्। प्राप्तेऽति क्तस्य कर्त्रर्थकस्य कर्मणिलक्षणा प्राप्तौ चोदकस्य कर्त्तृतासम्बन्धेनान्वय इत्यपि

षेषो हि प्रथमा तदन्यपदार्थश्च कर्मादिरिति। प्राप्तमुदकं यं प्राप्तोदको ग्रामः। उदककर्त्तृकप्राप्तिकर्मीभूत इत्यर्थः। यद्यपि क्तप्रत्ययार्थस्य कर्तुर्धात्वर्थं प्रति विशेष्यतोचिता तथापि व्यपेक्षावादिभिरगत्या समासे भिन्नैव

मित्यनेनैव प्रतिपादितत्वादिति दर्शयति। 'सर्वेषु विभक्त्यर्थेष्विति'। पदेन प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोभिधीयतइति विभक्त्यर्थस्य प्राधान्यात्तस्यैवान्यपदार्थग्रहणेन ग्रहणमिति भावः। अत एव प्राप्तोदकोऽयं ग्राम इति ग्रामशब्दानुप्रयोगः, अन्यथा यावानेवार्थो ग्रामपदस्य तावतो ऽभिधाने गतार्थ-

अथवेति। (कै)

अत्र सर्वत्रान्योऽर्थो बड्ग्य इति बोध्यम्॥

अभिजनशुद्धिरपि (कै)

इत्यपिरेवार्थे॥ भाष्ये वाक्यशब्देन पदसमूहमाचम्॥

व्याप्तिसमाश्रयणेति। (कै)

पदार्थग्रहणसामर्थ्याद् व्याप्तिन्यायस्यैवानुसरणे नान्तरङ्गन्याय-स्येत्यर्थः। राजानं पुरुषमित्यत्र सावकाशस्तत्पुरुषः। बहुव्रीहिरपि बहुपदे सावकाश इति प्रथमान्तपदद्वयेन विग्रहे परत्वात्स्वपदार्थोऽपि

न युक्तम्। उदकरूपकर्तृरनुक्तत्वेन ततस्तृतीयायां वैयधिकरण्याद् बहु-व्रीह्यनापत्तेः। उदककर्तृकप्राप्तिरिति बोधोत्तरं तत्कर्मनाम्नो लक्ष्यत इत्यपि न युक्तम्। प्रत्ययार्थप्राधान्यस्य नाम्नः सत्त्वप्राधान्यस्य च भङ्गा-पत्तेः। विशेषणे कर्तरि एकदेशत्वेनोदकान्वयासम्भवाच्च इति नव्यन्याय-विदः तन्न। उत्तरे पदे एव लक्षणायां विनिगमकाभावात्। न च प्रत्य-यानां सन्निहितपूर्वपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरुत्तरपदे तत्करणे विनि-

---

व्युत्पत्तिः स्वीकरणीया। सिद्धान्ते तु एकार्थीभावाभ्युपगमात्सर्वं सुस्थमि-त्युक्तम्। ऊढरथोनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। चित्रगुः। दीर्घपुरुषको ग्रामः प्रथमार्थे तु न भवति। दृष्टे देवे गतः।

त्वान्न स्याद्यदा द्वन्द्वे चशब्दस्य, यदा तु समासेन विभक्त्यर्थ एव सम्बन्धा-दिरभीष्यते तदा विभक्तिर्मानुप्रयोजि, द्रव्यस्यानभिहितत्वात्तद्वाचिनोऽनु-प्रयोगः कस्मान्न स्यात् यदि विभक्त्यर्थोऽभिधीयते कथं ग्रामादिभिः सामा-नाधिकरण्यं तल्लिङ्गसंख्यायोगे वा बहुव्रीहिर्भवति प्राप्तोदको ग्राम उद्धृ-तौदना स्थालीति। उच्यते। विभक्त्यर्थस्य सम्बन्धादेराश्रितत्वेन गुणत्वाद्-

बहुव्रीहिः प्राप्नोतीति तद्व्यावृत्त्यर्थमन्यग्रहणं चिकतस्त्राच्च शेष इति भावः॥ भाष्ये एकदेशाह

नैतदस्तीत्यादि॥ (भा)

तत्पुरुषः। (भा)

समानाधिकरणतत्पुरुषः। राजपुरुष इत्यादिरपि कर्मधारय एव॥ इतर एकदेशाह

भवेदित्यादि॥ (भा)

स्वरसमासान्तेति। (कै)

पर्यायेणेत्यर्थः। यद्वा कस्य चित्स्वरः कस्य चित्समासान्त इत्यर्थः॥ भाष्ये

गमिका राज्ञः पुरुष इत्यादौ षष्ठ्यर्थस्य पुरुषे ऽन्वयवारणाय पूर्वपदार्थेन वाच्यम्। सर्वक इत्यादौ व्यभिचारात्। दधीयद्ददाति इत्यादौ दध्नि-वत्त्वार्थान्वयापत्तेश्च। दधिबद्धपटुर्ददाति इत्यादौ दध्नि बद्धजर्थान्वयापत्तिः। पटावनन्वयापत्तिश्च। किं चैवमन्यपदार्थे वर्त्तमानानेकसुबन्ताभावेन बहुव्रीहेरेवानापत्तिः। अपि चैवं घटादिपदेष्वपि चरमवर्णस्याच्-प्रत्ययरूपस्य लक्षणयैवोपपत्तौ विशिष्टशक्तिकथोच्छेदापत्तिः। अवयव-

---

व्यनेकोक्तेर्बहूनामपि, चित्राजरतीगुः। तन्वीदीर्घाजङ्घः। इह प्रथमो न पुंवत्। उत्तरपदत्वाभावात्। द्वितीयोऽपि न। अपूर्वपदत्वात्। उत्तरपदे नित्यसमासस्य तु नायं विषय इत्युक्तम्। एतच्च केषां चिन्मतम्।

भेदोपचारात्सामानाधिकरण्यमाश्रयतश्च लिङ्गवचनानि भविष्यन्ति शुक्लादिवत्, तथा शुक्लं वस्त्रं शुक्ला पटी शुक्लः कम्बलः शुक्लौ शुक्ला इति। नन्वेवं यथा शुक्लशब्देन कदा चिद्गुण उच्यते कदा चिद्गुणी तथा बहुव्रीहावपि प्राप्नोति। नैषोऽस्ति नियमो गुणशब्देन कदा चिद्गुणमात्रमभिधीयतइति

अशेषत्वान्न भविष्यतीति । (भा)

पदतोऽर्थतो वा शेष इत्यभिमानः ॥ एतदर्थकं शेषग्रहणं प्रत्याख्यातमित्याह

प्रत्याख्यानमिति । (कै)

[१]"आकडार"सूत्रोक्तमित्यर्थः। पदतोऽर्थतश्च शेषे द्वीरावतीके दोषः। पदत एव शेषे वीरपुरुषकादौ दोषः ॥

समासविधाविति । (कै)

[२]"संख्यावंश्येन" [३]"नदीभिश्च" [४]"अन्यपदार्थे च संज्ञायां"

---

१ अ १ । पा ४ । सू १ ॥ २ अ २ । पा १ । सू १९ ॥
३ अ २ । पा १ । सू २० ॥ ४ अ २ । पा १ । सू २१ ॥

तल्लक्षणाद्यज्ञानतामपि बोधात् तत्र सा चेत् प्रकृतेऽपि तुल्यम्। क्वचिदवयवलक्षणाज्ज्ञानाद् बोधेऽपि न तत् तत् साधुत्वं सूत्रविरोधात्। सूत्रे लाक्षणिकार्थान्वाख्यानस्यादृष्टत्वात्। व्याकरणस्य शक्तिग्राहकत्वभङ्गापत्तेश्च। किं चैवं प्रातिपदिकात् कर्मत्वादौ खादय इति शास्त्रतः प्रत्यासत्त्या लब्धायाः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेस्तल्लब्धस्य परस्परं प्रकृतिप्रत्ययार्थान्वये एव तयोः साधुत्वस्य च भङ्गः। उत्तरपद-

---

परमार्थस्तु षाष्ठभाष्यादिपर्यालोचनया नेह पूर्वपदमाक्षिप्यते। आनङ् ऋत इत्यत्र यथा। इष्टसिद्ध्यनुरोधेन पूर्वपदं क्वचिदाक्षिप्यते न तु सर्वत्रेति ओजःसहोम्भ इति सूत्रे हरदत्तेनोक्तत्वाच्च। तेनोपान्त्यस्य पुंवदेव।

पङ्क्तादिष्वदर्शनात्, नहि भवति देवदत्तस्य पटुरिति तद्वदिहापि नित्यमेव गुणिनिष्ठता भविष्यति, एवमपि बहुव्रीहिणा यथा विभक्त्यर्थस्याभिधानात् षष्ठ्यादयो न भवन्ति तथा लिङ्गसंख्ययोरप्यभिधानात्तयोर्वाचकाः प्रत्यया

"मध्यमध्यमवीराश्च" [1]"नञि"त्येति भावः॥ पदतोऽर्थतश्च प्रेषार्थकस्य तस्य प्रत्याख्याने परंकार्यमिति पाठे ऽन्यग्रहणमावश्यकमित्याह तत इति॥ (कै)

नीलोत्पलं सर इति। (कै)

इदमुपलक्षणं बहुपदकबहुव्रीहिः। स्वपदार्थेऽपि स्यादित्यपि बोध्यम्। परिनिष्ठितविभक्त्या समासमज्ञानतो भाष्ये ऽक्रियमाणे इत्याद्युक्तिरिति बोध्यम्॥

---

१ अ २। पा २। सू ६॥

मात्रस्य प्रकृतत्वात्। प्रकृतित्वं च प्रत्ययविधानावधित्वम्। तज्ज्ञानविशेष्यत्वं च प्रकृत्यर्थत्वे। एतेन प्राप्तोदको ग्राम इत्यादौ यदुक्तन्तदप्यपास्तम्। किं च स्वाद्यर्थघटितलक्षणायां तात्पर्यग्राहकत्वस्य चित्रगुरित्यादौ लुप्तस्य भङ्गापत्तिः। व्युत्पत्त्यन्तरस्वीकारे विशिष्टशक्तिरेवोचिता। एवम् ऊढरथादावपि विशिष्टशक्तिवादिनास्तु न कश्चिद् व्युत्पत्तिविरोधः सर्वव्युत्पत्तीनां भिन्नोपस्थितिजनकशब्दविषयत्वात्। तत्र विशेष्यविशेषणभावविपरीत्यान्तर्भावेनैव संसर्गे ऽन्यपदार्थे च शक्तिकल्पना।

चित्राजरद्गुरित्यादि। अत एव चित्राजरत्वौ गावौ यस्येति विग्रहेप्येवमेव। अदृष्टसदृशप्रजमिति तु कर्मधारयोत्तरपदो द्वयोरेव बहुव्रीहिः। अपि च परमस्वधर्मः। स्वशब्दस्य निरपेक्षपूर्वपदत्वाभावात्ततो धर्मशब्दपरो न तु केवलादिति नानिच्। कर्मधारयपूर्वपदे तु भवत्येवेति वक्ष्यते। किञ्च

न प्राप्नुवन्ति, नैष दोषः। स्वार्थिकाष्टाबादयः स्त्रियां यद्दर्तते तस्मात्स्वार्थिकाष्टाबादयो भवन्तीति तेन बहुव्रीहिणाऽभिहितेऽपि स्त्रीत्वे भविष्यन्ति एवं च कृत्वा 'ऽनो बहुव्रीहे' रित्यद्युपपन्नं भवति, समासेन च बाह्यक्रियापेक्षा या कर्मादिशक्तिस्तद्रहितसमासप्रातिपदिकार्थमात्रस्यैवैकत्वादेरुक्त-

कंठेकाल इत्यादिश्चेति। (कै)

बहुपदके बहुव्रीहिविधानं सावकाशमिति वक्तुं युक्तम्॥

ततश्चेति। (कै)

न चैकसंज्ञाधिकारात् बहुव्रीहिसंज्ञया कर्मप्रवचनीयत्वबोधे षत्वं स्यात्। किं च कर्मप्रवचनीयत्वस्य निरवकाशत्वेन तया बाधाद्बहुव्रीहिसंज्ञैव न भविष्यतीति वाच्यम्। उपसर्गसंज्ञाया अपि तद्रीत्या बाधात् परं कार्यत्वपक्षे समावेशसंभवाच्चेत्यभिमानः॥

चित्रगुरित्यादौ स्वामिभावादिसम्बन्धेन चित्रगोविशिष्टः समासार्थस्तत्रान्वयः स्वस्वामिभावादिः सम्बन्धश्चेत्युभयं समासार्थः। यद्वा संसर्गरूपोविभक्त्यर्थ एव बहुव्रीहिशक्यः। न च विभक्त्यर्थस्यासत्त्वरूपतया लिङ्गसंख्याकार्य्यानुपपत्तिरिति वाच्यम्। गुणवचनवत् यत् द्रव्याश्रितो ऽसौ सम्बन्धः तल्लिङ्गसंख्याभ्यां तस्य योगाङ्गीकारात्। एवं समासेनाभिधीयमानः सम्बन्धः सम्बन्धितादात्मेनैवाभिधीयते। तत्र द्विष्ठत्वेऽपि सम्बन्धस्य सम्बन्धान्तरस्य विशेषणतया शब्देनैवोपात्तत्वात् प्राधान्याच्च स्वामिन एवाश्रयत्वं व्यवस्थाप्यत इति तद्वल्लिङ्गसंख्या भवतः॥

सुसूक्ष्मजटकेशेन सुनताजिनवाससा।
समन्तग्रितिरन्ध्रेण द्वयोर्दृष्टौ न सिध्यति॥

अयं श्लोकः समर्थसूत्रे भाष्ये पठितः। सुष्ठु सूक्ष्मा जटाः केशा

त्वादिति कर्मादिगतैकत्वादिप्रतिपादनाय वचनानि भविष्यन्ति चित्रगुं पश्य चित्रगुणा दृतमिति, एवमपि प्रथमा न प्राप्नोति समासेन संख्याया अभिधानात्, वचनग्रहणादेको द्वौ बहव इतिवद्भविष्यति, अथवा लिङ्गमात्रं संख्यामात्रं बहुव्रीहिणाभिहितं न विशेषस्तत्रावश्यं विशेषार्थिना

Nityācārapaddhati, Fasc. 1-7 @ /10/ each	Rs.	4	6
Nityācārapradīpa, Fasc. 1-7 @ /10/ each		4	6
Nyāyabindutikā, Fasc. 1 @ /10/ each		0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2–6 Vol. II, Fasc. 1–8 @ /10/ each		5	0
Padumawati, Fasc. 1–4 @ 2/		8	0
Pariçiṣṭa Parvan, Fasc. 1–5 @ /10/ each		3	2
Prākṛita-Paingalam, Fasc. 1–7 @ /10/ each		4	6
Prithvīrāj Rāsa, Part II, Fasc. 1–5 @ 10/ each		3	2
Ditto (English) Part II, Fasc. 1 @ 1/- each		1	0
Prākṛta Lakṣaṇam, Fasc. 1 @ 1/8/ each		1	8
Parāçara Smṛti, Vol. I, Fasc. 1–8 Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /10/ each		12	8
Parāçara, Institutes of (English) @ 1/- each		1	0
Prabandhacintāmaṇi (English) Fasc. 1–3 @ 1/4/ each		3	12
Ṣaddarśana-Samuccaya, Fasc. 1, @ /10/ each		0	10
*Sāma Vēda Saṁhitā, Vols. 1, Fasc. 5–10; II, 1–6; III, 1–7; IV 1–6; V, 1–8, @ /10/ each		20	10
Sāṅkhya Sūtra Vṛtti, Fasc. 1–4 @ /10/ each		2	8
Ditto (English) Fasc. 1–3 @ 1/- each		3	0
*Sankara Vejaya, Fasc. 2–3 @ /10/ each		1	4
Srāddha Kriyā Kaumudī, Fasc. 1–6 @ /10/ each		3	12
Srauta Sutra Latyayan, Fasc. 1–9 @ /10/ each		5	10
,, ,, Asbalayana, Fasc. 1–11 @ /10/ each		6	14
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each		1	0
Śuddhi Kaumudī, Fasc. 1–4 @ /10/ each		2	8
*Taittreya Brahmana, Fasc. 3–25 @ /10/ each		14	6
,, Pratisakhya, Fasc. 1–3 @ /10/ each		1	14
*Taittirīya Saṁhitā, Fasc. 22–45 @ /10/ each		15	0
Tāṇḍya Brāhmaṇa, Fasc. 1–19 @ /10/ each		11	14
Tantra Vārtika (English) Fasc. 1–6 @ 1/4/		7	8
*Tattva Cintāmaṇi, Vol. I, Fasc. 1–9, Vol. II, Fasc. 2–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1 Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /10/ each		23	12
Tattvārthādhigama Sutram, Fasc. 1–3 @ /10/		1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1–3 @ /10/		1	14
Tul'si Satsai, Fasc. 1–5 @ /10/		3	2
Upamita-bhava-prapañca-kathā, Fasc. 1–9 @ /10/ each		5	10
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/-		6	0
Vallāla Carita, Fasc. 1 @ /10/		0	10
Varṣa Kriyā Kaumudī, Fasc. 1–6 @ /10/		3	12
*Vāyu Purāṇa, Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /10/ each ...		7	8
Vidhāna Pārijata, Fasc. 1–8 @ /10/		5	0
Vivādaratnākara, Fasc. 1–7 @ /10/ each		4	6
Vrhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/		3	12
*Yoga Aphorisms of Patanjali, Fasc. 2–5 @ /10/ each		2	8

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each	Rs.	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–6 @ 1/ each		14	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1–6; Vol. II. Fasc. 1–5 @ 1/ each		11	0

Arabic and Persian Series.

'Alamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /10/ each ...	Rs.	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ 1/-		3	0
Āin-i-Akbari, Fasc. 1–22 @ 1/8/ each		33	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 2/- each		34	0
Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each		55	8
Ditto English Vol. I, Fasc. 1–8; Vol. II, Fasc 1–3 @ 1/4/ each		13	12
Arabic Bibliography, by Dr. A. Sprenger @ /10/		0	10
*Bādshāhnāmah, with Index, Fasc. 1–19 @ /10/ each		11	14
Conquest of Syria, Fasc. 1–9 @ /10/ each		5	10
Catalogue of Arabic Books and Manuscripts 1–2 @ 1/- each ...		2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/8/ each		31	8
Farhang-i-Rashidi, Fasc. 1–14 @ 1/8/ each		21	0
Fihrist-i-Tūsi, or, Tūsy's list of Shy'ah Books, Fasc. 1–4 @ 1/- each ...		4	0
Futūn-ush-Shām of Wāqidi, Fasc. 1–9 @ /10/ each		5	10
Ditto of Āzādi, Fasc. 1–4 @ /10/ each		2	8

* The other Fasciculi of these works are out of stock, and complete copies cannot

Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each	Rs.	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	...	7	8
Iqbālnāmah-i-Jahāngīri, Fasc. 1-3 @ /10/ each	...	1	14
Isābah, with Supplement, 51 Fasc. @ 1/- each	...	51	0
Maāsir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each	...	35	0
Maghāzi of Wāqidi, Fasc. 1-5 @ /10/ each	Rs.	3	2
Muntakhabu-t-Tawārikh, Fasc. 1-15 @ 10/ each	Rs.	9	6
Ditto (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/ each	...	15	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each	...	11	14
Ma'āsir-i-'Ālamgīri, Fasc. 1-6 @ /10/ each	...	3	12
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	...	0	10
Nizāmi's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12/ each	...	1	8
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each	...	3	2
Ditto (English) Fasc. 1-5 @ 1/	...	5	0
Tubaqnat Nasiri, Fasc. 1-5 @ /10/ each	...	3	2
Ditto (English) Fasc. 1-14 @ 1/ each	...	14	0
Ditto Index	...	1	0
Tārikh-i-Firūz Shāhi of Ziyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each	...	4	6
Tārikh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each	...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	...	3	0
Wis o Rāmin, Fasc. 1-5 @ /10/ each	...	3	2
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each	..	10	10
Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1 @ 1/	...	1	0

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each	20	0
2.	PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Journal and Proceedings, N.S., 1905, to date, @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.		
5.	Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.		
6.	Centenary Review of the Researches of the Society from 1784-1883	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, 1884.	3	8
8.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
9.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each	18	0
10.	Tibetan Dictionary, by Csoma de Körös	10	0
11.	Ditto Grammar " "	8	0
12.	Kaçmiraçabdāmṛta, Parts I and II @ 1/8/	3	0
13.	A descriptive catalogne of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
14.	Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0
15.	Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott.	10	0

Notices of Sanskrit Manuscripts, Fasc. 1-33 @ 1/ each	...	33	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

1-1.07.

Books are supplied by V.P.P.

PK
531
A15
1899
v.3
pt.5

Pātañjali
Mahabhasyapradīpodyotah

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY